Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीः

श्रीसपर्यामृतम्

तस्यायं

प्रातःकृत्यादिभोजनविधिपर्यन्तः

प्रथमो भागः

यस्य

रचयिता

बुद्धिसागरपराजुलिः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सादर समर्पित

श्रीः

श्रीसपर्यामृतम्

दशमहाविद्यान्तर्गत-श्रीविद्यासंक्षिप्तपूजाविध्यात्मकम्

❀ यत्र च प्रातरुत्थानादारभ्य नीराजना-गुरुवन्दना-
षट्चक्रचिन्तनमन्त्रयोगान्तर्याग-प्रातःस्तुत्यजपाजप-
स्नान-संध्या-ब्रह्मयज्ञ-तर्पण-नित्यहोम-
श्रीन्यत्रपूजावैश्वदेविकहोमवलि-भोजन-
विधिपर्यन्तकर्मणां निरूपणं कृतं ❀

तस्यायं

प्रथमो भागः

महतायासेन नानाग्रन्थानवलोक्य

बुद्धिसागरपराजुलिना विरचितः

तस्येदं

प्रथमं संस्करणम्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पुरातत्त्वप्रकाशनमाला ७३

प्रकाशक :—

राष्ट्रियाभिलेखालयः

अस्य सर्वोऽप्यधिकारः
ग्रन्थकर्तुरधीनः

प्राप्तिस्थानम्:—

साझाप्रकाशनम्

काठमाडौं

मुद्रकः-
संकटा प्रेस
६/५३४ टेबहाल

मूल्यम्:—

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विभागीय वक्तव्य

यो "श्रीसपर्यामृत" भंने पुस्तक भगवतीका दश महाविद्या मध्ये श्री विद्या अर्थात् त्रिपुरसुन्दरीको आराधना संवन्धी ग्रन्थ हो। यसका रचयिता राष्ट्रिय अभिलेखालयका प्रधान अनुसंधान अधिकारी बुद्धिसागर पराजुली हुनुहुन्छ।

श्रीविद्या हामी नेपालीहरूको मान्यताप्राप्त देवी हुन्, किनभने श्री पशुपतिनाथका ठूलो लिङ्गका शिरमा प्रतिदिन श्रीविद्याको यन्त्र जसलाई श्रीयन्त्र, श्रीचक्र इत्यादिनामले पुकारिन्छ सो लेखेर पूजा हुन्छ। यस पूजामा शुद्ध सात्त्विक विधि अपनाइयेको हुन्छ र यस प्रकारको सुन्दर ढंगको पूजा संभवतः यो युगमा यस विश्वमा अति दुर्लभ होला। श्रीविद्या नेपालीको निजी विद्या हो भंनामा कुनै अत्युक्ति नहोला। तसर्थ श्रीपराजुलीज्यूले नेपालीको संस्कृतिको निमित्त यौटा स्थायी सेवा दिनुभएकोछ।

यसमा श्रीयन्त्रको संक्षिप्त पूजा छ तर आशा गरिन्छ उहाँले विस्तृत पूजाविधि लेखिसक्नुभयेको होला। यसमा अरू प्रातः कृत्य संबन्धी विधानहरूको पनि ठूलो संग्रह परेको छ। जुन संग्रह शास्त्रीय सदाचारमा विश्वास राखी आफ्नो आचरणको पालना गर्ने सबै

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नेपालीहरूका लागि र अरू पनि वैदिक सनातन धर्मका अनुयायीहरूलाई मान्य हुनेछ। साथै यसबाट अन्तस्तत्त्वको अनुसंधानात्मक चिन्तन गर्ने एकान्तसेवीहरूलाई ठूलो मद्दत मिल्ने छ भंने आशा राखिन्छ। तसर्थ यस्तो ग्रन्थ लेखी प्रकाशन समेत गरे गरायेकोमा राष्ट्रिय अभिलेखालय र श्रीपराजुलीजी धन्यवादका पात्र हुनुहुन्छ।

रमेशजंग थापा

निर्देशक

शि. मं. पुरातत्त्वविभाग

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूमिका

श्रीविद्यासागरस्फूर्जदूर्मिमालाकुलां तरीम् ॥
यः पारमनयद् वन्दे तं विद्यारण्यनाविकम् (देशिकम्) ॥१॥

बुद्धिसागरगर्गर्यां नानागमरसाकुलम् ॥
श्रीसपर्यामृतमिदं गुरुमन्दरलोडितम् ॥२॥

प्रातरुत्थानमारभ्य भोजनावधिको विधिः ॥
श्रुतिस्मृत्यागमान् वीक्ष्य संक्षेपादत्र वर्णितः ॥३॥

स्वान्तःसुखाय साधूनां जिज्ञासापूरणाय च ॥
मर्यादार्थं पशुपतेः प्रयासोऽयं मया कृतः ॥४॥

गुर्वागमकुलाचारशिक्षादीक्षापराङ्मुखाः ॥
शास्त्रेष्वधीतिनो ये च तैरध्येयं विमत्सरैः ॥५॥

अपि त्यक्तसदाचाराः परशिक्षामलीमसाः ॥
आगच्छेयुः सुपन्थानं तैस्त्वध्येयं प्रयत्नतः ॥६॥

उपाधये च सेवायै वादायाधीतशास्त्रकैः ॥
ज्ञेयं किमपि तत्त्वं चेत्तैश्चाध्येयं कृतादरैः ॥७॥

श्रीयन्त्रपूजनविधिः संक्षेपेणेह दर्शितः ॥
विद्यागुरुकृपासत्त्वेऽवश्यं विस्तारमेष्यति ॥८॥

अजपाजपसंख्या च वैदिक्यत्र समाश्रिता ॥
वेदतन्त्रविरोधे हि वेदार्थो बलवत्तरः ॥९॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्राणापानक्रियारूपो हंसमन्त्रजपात्मकः ॥
अजपाजप इत्याख्यस्तत्संख्येत्थं श्रुतौ मता ॥१०॥

तदेष श्लोकोऽभ्युक्तः–

श्रमादन्यत्र परिवर्तमानस्तिष्ठन्नासीनो यदि वा स्वपन्नपि ॥
अहोरात्राभ्यां पुरुषः समेनत कतिकृत्वः प्राणिति चाप चानितीति ॥

तदेष श्लोकः प्रत्युक्तः–

शतं शतानि पुरुषः समेत अष्टौ शता यन्मितं तद्वदन्ति ॥
अहोरात्राभ्यां पुरुषः समेन तावत्कृत्वः प्राणिति चाप चानितीति ॥

[पृ. १२१० शतपथब्राह्मणम्, अच्युतग्रन्थमाला काशी]

तस्मात् सर्वप्रयत्नेन वैदिको वेदमाश्रयेत् ॥
वेदाधिकारहीनस्तु भवेत्तत्राधिकारवान् ॥१३॥इति च

[दे. भा. स्क. ७]

येषां ग्रन्थात्संग्रहाद् वा यत्किञ्चिदपि संचितम् ॥
तेषां सदा कृतज्ञोऽस्मि श्रद्धया संनतोऽस्मि च ॥१४॥
तस्याः पराया विद्यायास्तेषां गुरुपदां सदा ॥
स्मराम्यनुग्रहं नित्यं यत्प्राप्ता प्रेरणा मया ॥१५॥
भ्रमादज्ञानतो दोषादिन्द्रियाणां च संभ्रमात् ॥
मुद्रायन्त्रस्य स्खलनाद् या त्रुटिः क्षम्यतां बुधैः ॥१६॥

इति विलिख्य लेखनीव्यापारतो विरमति

बुद्धिसागरः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीसपर्यामृतस्य

शुद्धिपत्रम्

अशुद्धम्	शुद्धम्	पृष्ठम्	पंक्तिः
चोरमत्रं	चोरमन्त्रं	१	२१
हरीतकी तथाधात्री	हरीतकी बिल्व धात्र्यौ	१	२३
निम्वाश्त्वथ	निम्वाश्वत्थ		
तित्तिणी	तिन्तिणी	१	२४
विलग्न	विलग्नं	२	९
ऋन्यादि	ऋष्यादि	४	१५
परशिव	परशिवं	८	१३
मामनद्या	मामनघा	९	१५
पदस्थन	पदस्थान	१०	५
घटना	घाटना	१०	८
मूलाधार स्थितां	मूलाधारस्थितां	१०	१०
ब्रह्मरध्वन्त	आधारादित	११	११
दसुधादि शिवावसातम्।।	वसुधादिशिवावसानम्	१३	१०
मानसि कहोमं	मानसिकहोमं	१३	१३
ऋष्यादि	ऋष्यादि	११	१५
मीश	मीशं	१५	१
ससार	संसार	११	२
विभ्राणां	विभाणां	१८	२
बाराणस्या	वाराणास्यां	२१	१३,१७
ढुण्ठी	ढुण्डि	"	२१

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अशुद्धम्	शुद्धम्	पृष्ठम्	पंक्तिः
निश्वासोच्छ्रास	निश्वासोछ्वास	२३	९
वेदोक्तख्यातो	वेदोक्तसंख्यातो	२३	२१
सर्व भूतान्तरात्मा ।।	सर्वभूतान्तरात्मा ।।]	२५	४
कान्तिशदृशं	कान्तिसदृशं	२५	११
शैब्द	शब्द	"	१५
वोषट्	वौषट्	"	१६
ऊँ रं	ॐ रं	"	१८
ऊँ वं	ॐ रं	"	१९
नैवेद्य	नैवेद्यं	"	२०
ॐ शंशक्तयात्मने	ॐशं शक्त्यात्मने	"	२१
सतश्चयोनि मसतश्च	सतश्च योनिमसतश्च	२७	६
टं डं	टं ठं	२८	८
टङ्कमृगवरामयहस्ताय	खट्वाङ्गडमरुपिनाकत्रिशूलहस्ताय	"	११
अनाद्यन्ताखण्डाद्वय-	" "	"	२२
गायत्री जपः	गायत्रीजापः	३०	७
ऋषि	ऋषि	"	८
विनियोग,	विनियोगः,	"	९
तुरीच्छन्दसे	तुरीयच्छन्दसे	"	१०
विमुच्यते । इहि	विमुच्यते, इति	३१	२०
सन्ध्योश्च	सन्ध्ययोश्च	३२	२३
निमज्जो	निमज्जे		
घृतने	घृतेन नो	३९	८
वहन्ति	प्रवहन्ति	"	९
माभि	मातृभि	"	२०
अंवमृथ	अवभृथ	४०	१५
अवयश्व	अवयक्ष्व	"	९

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अशुद्धम्	शुद्धम्	पृष्ठम्	पंक्तिः
मदत्तः	मदन्तः	४२	१
ऋपस्पाहि	रिषस्पाहि	४३	८
ॐ अपाध	ॐ अपाव	"	१३
द्धान्तपसो	द्धान्तपसो	"	२०
प्रजापते	प्रजापतेः	४६	४
नमः	नमः।। इति	"	१२
विभूर्ति	विभूति	४७	२०
त्रष्टु	त्रिष्टु	"	२३
दर्भयाणि	दर्भपाणिः	४८	२३
मामापोऽसमां	मामापोऽसतां	५१	८
भाववृतिर्देवता	भाववृत्तो	५२	१
यो याज्ञ	भोयाज्ञ	५६	६
भृगुगोमय	भृगुगोतम	५९	५
नीति	दीनि	"	"
यजूँसि	यजूंषि	"	"
इषेत्वोर्जेवेत्वा	इषेत्वोर्जेत्वा	"	९
आपादेयेत्	आवाहयेत्	६१	४
उदेच्यै	उदीच्यै	६९	११
शौर्यमास	पौर्णमाज	"	१८
भूकसीम्	भूयसीम्	७२	४
प्राचीनावीर्न	प्राचीनावीती	७३	२
श्रोत	श्रौत	७४	२
व्यरीरिचं	त्यरीरिचं	७५	४
.....	अथ श्रीयन्त्रपूजा	७८	१
निर्गर्भ	निगर्भ	"	"
विद्रविरणी	विद्राविणी	७९	१

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अशुद्धम्	शुद्धम्	पृष्ठम्	पंक्तिः
डाकिनीस्वरूपां	याकिनीस्वरूपा	८३	१२
पशूंत्त	पशूंस्ते	८५	१
श्रियां	श्रिया	८५	२
हन्ततेऽन्नाम्	हन्ततेऽन्नम्	९१	१
कृ०	कृतं	९२	८
ऽ नासक्तिः योग	ऽनासक्तियोगः	९२	१०
अभिपिंच्य	अभिषिच्य	९२	२१
श्रकर्ण	श्रवण	९५	१९

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ

श्रीसपर्यामृते

प्रातः कृत्यम्

श्रीमान् साधको ब्राह्मे मुहूर्ते इष्टदेवतां स्मृत्वा दक्षाङ्गे नोत्थाय हस्तौ पादौ प्रक्षाल्याचम्य क्षणं भासां विचिन्त्य स्वेष्टदेवता-नमस्कारमन्त्रमुच्चरन् ॐ कुण्डलिन्यै नमः इति नमस्कारमुद्रया नत्वा हृदि हस्तं दत्वा क्रौं इति दशधा जपित्वा कपाटबन्धनं करोमीति पठित्वा ह्रीं ह्रीं नेत्रयोः, हूँ हूँ कर्णयोः, क्रीं क्रीं नासिकयोः, स्त्रीं स्त्रीं मुखे, ऐँ नाभौ, हेँ सौं लिङ्गमूले, व्लूँ गुदे, ॐ मनःस्थाने भ्रुवोर्मध्ये,, एवं विन्यस्य क्रोँ ह्रीँ क्रीँ स्त्रीँ स्त्राँ ऐँ हेँ सौः व्लूँ इति दशधा एकधा वा जपित्वा (१) हरीतकीधात्री-निम्बाश्वत्थकदम्बोदुम्बरवटबिल्वतिन्तिणीभ्यः (२) कुलवृक्षेभ्योनम इति प्रणम्य रात्रिवासः परित्यज्य मानसस्नानं विधाय शुद्धवस्त्रं परिधाय देवीं नमस्कृत्य आगमस्थानं प्रविश्य मार्जनोपलेपनादिकं कृत्वा प्राणायामादिकं विधाय मङ्गलारार्त्तिकं कुर्यात्। तत्प्रकारश्चः-पात्रे दीपं प्रज्वाल्य अस्त्राय फडिति संप्रोक्ष्य मूलेन संपूज्य दीपमादायोत्थायेति पठेत्:-

उच्चैस्तोरणवृत्तिवाद्यनिवहध्वाने समुज्जृम्भिते
भक्तैर्भूमिविलग्नमौलिभिरलं दण्डप्रणामे कृते ॥

---

[१] प्रात.काले च शय्यायां मुक्तस्वापः स्वदेहके। तथा एकादशद्वारे चौर-मन्त्राणि विन्यसेत्। दशधा चोरमत्रंच एकधावापि संजपेत् ।ततस्तु पूजयेद्देवीं यस्य या इष्टदेवता ; प्रारम्भे सर्वकार्याणां न्यसेच्चोरविनायकम्। इति

[२] हरितकी तथा धात्री निम्बाश्वत्थकदम्बकाः।
उदुम्बरो वटश्चैव तिन्तिणी नवमः स्मृतः।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नानात्नसमूहशोभिकनकस्थालीसमुद्भसितां
प्रातस्ते परिकल्पयामि पदयोर्नीराजनामुज्ज्वलाम् ॥

ॐ ऐँ ह्रीं श्रीँ कएईल ह्रीँ हसकहलह्रीँ सकलह्रीँ साङ्गायै सपरिवारायै सायुधायै सवाहनायै सावरणायै श्रीमहाकामेश्वरसमन्वितायै राजराजेश्वर्यै श्रीमहात्रिपुरसुन्दरीश्रीपादुकायै नम इति मङ्गलारार्तिकं कृत्वा आसने उपविश्य स्वशिरःस्थसहस्र(१) दलकमलकर्णिकाया मध्ये उपरि द्वादशदलकमलकर्णिकायां श्रीमहात्रिपुर-

---

[१] सहस्रारे महापद्मं कर्णिकायां विचिन्तयेत् ।
विलग्न सहितं पद्मं दलैर्द्वादशभिर्युतम् ॥
शुक्लवर्णं महातेजो वीजैर्द्वादशभिः स्थितम् ।
हसक्षमलवरयूं हसखफ्रें यथाक्रमम् ॥
तन्मध्ये कर्णिकायान्तु अकथादित्रिरेखकम् ।
हलक्षकोणसंयुक्तं प्रणवस्तत्र वर्त्तते ।
नादविन्दुमयं पीठं ध्यायेत्तत्र मनोरमम् ।
तत्रोपरि हंसयुग्मं पादुका तत्र वर्त्तते ॥
ध्यायेत्तत्र गुरुं देवं द्विभुजं च त्रिलोचनम् ।
वामाङ्कगतया देव्या रक्तयाऽरुणवस्त्रया ॥
वामकरधृतलीलापद्मया शुद्धवेषया ।
दक्षिणेन भुजेनैवालिङ्गितं परमेश्वरम् ॥
श्वेतानुलेपनं श्वेतं मुक्तादामविभूषितम् ।
श्वेताभरणसंवीतं चन्द्रकान्तिसमप्रभम् ॥
द्विलोचनं ज्ञानमुद्रां पुस्तकं करयोर्धृतम् ।
प्रभुं शान्तं सुप्रसन्नं श्रीगुरुं शिवरूपिणम् ॥ इति

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुन्दरीनामकपरविन्दौ स्थितं श्वेतवर्णं सुप्रसन्नं लसद्भूषणभूषितं द्विभुजं वराभयधरं श्वेताम्बरं श्वेतमाल्यानुलेपनं वामाङ्कस्थया रक्तवर्णया रक्तमाल्यानुलेपया रक्ताभरणवस्त्रया वामकरधृतलीलाकमलया स्वशक्त्या दक्षहस्तेनालिङ्गितं वशीकृतबाह्याभ्यन्तरेन्द्रियमन्तः प्रवणचित्तं शान्तं शिवस्वरूपं श्रीगुरुं गुरुदेवात्मनामैक्यं संभाव्यः--

सहस्रदलपङ्कजे तुहिनरश्मिबिम्बोदरे
श्रुताक्षरकथादिभिः प्रसृमरे हलक्षान्तरे ॥
वराभयकरं गुरुं हृदि सुगन्धिमाल्याम्बरं
भजे शिरशि भासुरं तरुणरक्तशक्त्या युतम् ॥

इति ध्यात्वा तच्चरणनिःसृतपीयूषधारयाऽऽप्लुतं स्वशरीरं विभाव्य श्रीगुरुं मनसा पूजयेत्-

ॐलं गन्धतन्मात्रप्रकृत्यानन्दात्मकपृथिव्यात्मने परमेश्वराय श्रीगुरुमूर्तये गन्धं परिकल्पयामि नमः ।

ॐ हं शब्दतन्मात्रप्रकृत्यानन्दात्मकाऽऽकाशात्मने परमेश्वराय श्रीगुरुमूर्तये पुष्पं परिकल्पयामि नमः । ॐ यं स्पर्शतन्मात्रप्रकृत्यानन्दात्मकवाय्वात्मने परमेश्वराय श्रीगुरुमूर्तये धूपं परिकल्पयामि नमः । ॐ रं रूपतन्मात्रप्रकृत्यानन्दात्मकवह्न्यात्मने परमेश्वराय श्रीगुरुमूर्तये दीपं परिकल्पयामि नमः ।

ॐ वं रसतन्मात्रप्रकृत्यानन्दात्मकामृतात्मने परमेश्वराय श्रीगुरुमूर्तये नैवेद्यं परिकल्पयामि नमः । ॐ लँ वँ रँ यँ हँ गन्ध-रस-रूप-स्पर्श-शब्दतन्मात्रप्रकृत्यानन्दात्मकपृथिव्यप्तेजो-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation, Delhi and eGangotri.

वाग्वाकाशात्मने परमेश्वराय श्रीगुरुमूर्तये पुष्पाञ्जलिं परिकल्पयामि नम इति संपूज्य, ॐ ऐँ ह्रीँ श्रीं ह् स् ख् फ्रें ह् स् क्ष म् ल् व् र् यूँ ह स ख फ्रें श्रीशिवानन्दनाथ-श्रीपार्वतीदेव्यम्बाश्रीपादुकां पूजयामि इति त्रिधा दशधा द्वादशधा वा प्रजप्य प्रणमेत्

ॐ आनन्दमानन्दकरं प्रसन्नं ज्ञानस्वरूपं निजभावयुक्तम् ॥
योगीन्द्रमीशं भवरोगमुक्तं श्रीमद्गुरुं नित्यमहं नमामि ॥

गुरुर्ब्रह्मा गुरुर्विष्णुर्गुरुर्देवः सदा शिवः ।
गुरुरेव परं ब्रह्म तस्मै श्रीगुरवे नमः ॥
अखण्डमण्डलाकारं व्याप्तं येन चराचरम् ।
तत्पदं दर्शितं येन तस्मै श्रीगुरवे नमः ॥
अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया ।
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥

इति प्रणम्य तदाज्ञां विभाव्य प्राणानायम्य श्रीमहात्रिपुरसुन्दरीमन्त्रस्य ऋन्यादिन्यासं कृत्वा षट्चक्रभावनां कुर्यात् ।

षट्चक्रभावना

मूलाधारचक्रं पीतवर्णं चतुर्दशकमलं वंशंषंसंवर्णयुक्तं तत्कर्णिकायां सोमसूर्याग्निमयं त्रिकोणं तन्मध्ये मोक्षबिन्दुं लं- [illegible] ध्यात्वा ॐ गंसाङ्गावरणाय सिद्धिलक्ष्मी शक्तिसहिताय महागणपतये नम, इति [illegible]

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation, Delhi and eGangotri.

अयोध्यानगरीं विभाव्य ह्रींस्त्रीं हूँ अधराम्नायेश्वर्यैनमः, इति नमस्कृत्य तदधः स्वयंभूलिङ्गं तदुपरि इडापिङ्गलासुषुम्णाग्रन्थि-मध्ये श्वेतं कामबीजं विचिन्त्य स्वयभूलिङ्गं किञ्चिद्वेष्टयित्वा तद्ग्रन्थिवेष्टिनीं सुषुम्णाद्वारं मुखेन पिधाय स्वपुच्छं स्वमुखेन धृत्वा सुप्तां कुण्डलिनीं ध्यायेत्-

(१) तदूर्ध्वे कुण्डलीशक्तिं चिद्रूपां श्रीपराम्बिकाम् ।
सार्धत्रिवलयाकारां प्रसुप्तभुजगोपमाम् ॥
जीवशक्तिस्वरूपां च ह्यूर्ध्वास्यां मन्त्रमातरम् ।
अष्टत्रिंशत्कलायुक्तां पञ्चाशद्वर्णविग्रहाम् ॥
श्रीपाशादपराविद्यारूपिणीं परमेश्वरीम् ।
तडित्कोटीप्रभादीप्तां विसतन्तुतनीयसीम् ॥
सर्वदेवाधिदेवीं च भावयेत् साधकोत्तमः ।

इति कुण्डलिनीं ध्यात्वा मूलाधारचक्रे कर्णिकायां त्रिपुरां ध्यायेत्-

ध्येया कुमुदपुष्पाभा पुस्तकाक्षाब्जयुग्मधृक् ।
त्रैलोक्यमोहने चक्रे त्रिपुरा सिद्धिभिर्युता ॥

इति मूलाधारचक्रं भावयित्वा लिङ्गमूले स्वाधिष्ठानचक्रं भावयेत् ।

लिङ्गमूले स्वाधिष्ठानमर्धचन्द्राकारं श्वेतवर्णं षड्दलकमलं बँ भँ मँ यँ रँ लँ वर्णयुक्तं तत्कर्णिकायां वँ बीजयुक्तं जलतत्वं ध्यात्वा ॐ ब्रह्मणे नम इति, नमस्कृत्य हस्रीं सकल ह्रीँ श्रीँ सौँ पूर्वाम्नायेश्वर्यै उन्मन्यै नमस्कृत्य स्वाधिष्ठानं मथुरानगरीं विभाव्य तत्र त्रिपुरेश्वरीं ध्यायेत्—

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

(२) ध्यायेत् षोडशचक्राख्ये सर्वाशापूरकाह्वये ।
तरुणेन्दुसमप्रख्यां पाशाङ्कुशवराभयाम् ॥
संयुतां चिन्तयेन्नित्यं श्रीचक्रे षोडशाह्वये ॥ इति ध्यात्वा

नाभौ मणिपूरचक्रं त्रिकोणाकारं रक्तवर्णं दशदलकमलं डँ ढँ णँ तँ थँ दँ धँ नँ पँ फँ वर्णयुक्तं तत्कर्णिकायां रंबीजयुक्तं तेजस्तत्त्वं ध्यात्वा ॐ विष्णवे नम इति नमस्कृत्य ॐ ऐँ क्लिँन्ने क्लीँ मदद्रवेकुले हसौँ दक्षिणाम्नायेश्वर्यै भोगिन्यै नम इति नमस्कृत्य मणिपूरं हरिद्वारभूमिं विभाव्य तत्र त्रिपुरसुन्दरीं ध्यायेत् ।

[३] ध्यायेत् सिन्दूरपुञ्जाभां श्रीमत्त्रिपुरसुन्दरीम् ।
सर्वसंक्षोभणे चक्रे पुस्तकाक्षवराभयाम् ॥ इति ध्यात्वा

हृदये अनाहतचक्रं कृष्णवर्णं वायुतत्त्वं षट्कोणाकारं तन्मध्ये द्वादशदलकमलं कँ खँ गँ घँ ङँ चँ छँ जँ झँ ञँ टँ ठँ वर्णयुक्तं तत्कर्णिकायां यं बीजयुक्तं वायुतत्त्वं ध्यात्वा ॐ रुद्राय नम इति नमस्कृत्य ह्सौँ हसः ख्फ्रेँ पश्चिमाम्नायेश्वर्यै कुब्जिकायै नमः इति नमस्कृत्य अनाहतचक्रं काशीभूमिं विभाव्य तत्र त्रिपुरावासिनीं ध्यायेत्-

भास्वज्जपाप्रसूनाभां पुस्तकाक्षवराभयाम् ।
हस्तैर्विधारिणीमम्बां सर्वालङ्करभूषिताम् ॥ इति ध्यात्वा

कण्ठदेशे विशुद्धिचक्रम्, आकाशवन्नीलवर्णम् आकाशत्त्वं वर्तुलाकारं षोडशदलकमलं अँ आँ इँ ईँ उँ ऊँ ऋँ ॠँ ऌँ ॡँ एँ ऐँ ओँ औँ अँ अँः वर्णयुक्तं तत्कर्णिकायां हँ

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

बीजयुक्तमाकाशतत्वं ध्यात्वा ॐ ईश्वराय नमः ह्रीँ हँसः सोहँ स्वाहा जीवात्मने नमः इति नमस्कृत्य विशुद्धिचक्रं काञ्चीभूमिं विभाव्य तत्र त्रिपुरश्रियं ध्यायेत्-

[५ सहस्रार्कसमाभासां चतुर्बाहुविराजिताम् ।
सर्वार्थसाधके चक्रे ध्यायन्ति त्रिपुरश्रियम् ॥
पुस्तकं चाभयं वामे मालां वरं च दक्षके ॥ इति ध्यात्वा

भ्रुवोर्मध्ये आज्ञाचक्रं विद्युत्कोटीप्रभं त्रिकोणाकारं मनश्चक्रं विभाव्य तन्मध्ये द्विदलकमलं हँ क्षँ वर्णयुक्तं तत्कर्णिकायां लँ बीजयुक्तं मनस्तत्वं ध्यात्वा ॐ ह्रीँ हं सः सोहं स्वाहा परमात्मने नम इति नमस्कृत्य आज्ञाचक्रम् अवन्तिकाभूमिं विभाव्य तत्र त्रिपुरमालिनीं ध्यायेत्-

[६] ध्यायेदन्तर्दशारस्थां त्रिपुरामालिनीं पराम् ।
रक्तवर्णां त्रिनयनां पाशाङ्कुशकपालकाम् ॥
वराभयधरां देवीं सर्वरक्षाकराह्वये ॥ इति ध्यात्वा

ब्रह्मरन्ध्रे नादचक्रम अ. उ. म. इत्यनेन निरोधितं द्रवरूपम् अर्धचन्द्राकारं चन्द्रमण्डलं महत्तत्वचक्रं विभाव्य हसक्षमलवरयूँ सहक्षमलवरयीँ आनन्देश्वर्यानन्देश्वराभ्यां नमः इति, नमस्कृत्य त्रिपुरसिद्धां ध्यायेत्-

[७] ध्यायेत्सर्वरोगहरे ऽष्टारचक्रे मनोहरे ।
कुन्दपुष्पप्रतीकाशां हिमशङ्खेन्दुवर्चसम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चन्द्ररेखाजटाजूटां त्रिनेत्रां शुद्धवाससम् ॥
नानालङ्कारसंयुक्तां पीनोन्नतघनस्तनीम् ॥
पाशाङ्कुशाभयां पात्रधरां त्रिपुरसिद्धिदाम् ॥ इतिध्यात्वा

पुनस्तत्र विन्दुचक्रम् ॐकारात्मकं तैजसं प्रकृतिचक्रं द्वारावतीभूमिं विभाव्य ह्सौँ: अर्धनारीश्वराय नमः, इति नमस्कृत्य त्रिपुराम्बिकां ध्यायेत्—

(८) ध्यायेत् त्रिकोणचक्राख्ये सर्वसिद्धिप्रदायके ।
बालार्कायुतसंकाशां त्रिनेत्रां शशिशेखराम् ।
पीनोन्नतस्तनीं देवीं मुण्डमालासृगुक्षताम ।
पुस्तकं जपमालां च वराभयलसत्कराम् ॥
सर्वालङ्कारसंयुक्तां श्रीमतीं त्रिपुराम्बिकाम् ॥इतिध्यात्वा

पुनः सहस्रदलकमलं ब्रह्मचक्रं मणिमयभूमिं विचिन्त्य तत्र पराम्बासहितं परशिव ध्यायेत्—

[९] नादविन्दुकलातीतं नित्यमानन्दलक्षणम् ।
ज्योतिर्मयमनाद्यन्तं सर्वव्यापिनमीश्वरम् ॥
जगच्चैतन्यरूपेण पराम्बासहितं विभुम् ।
एवं परशिवं ध्यायेद् नित्यमुक्तं निरञ्जनम् ॥इति ध्यात्वा

ॐह्सौँ:पराम्बासहितपरशिवाय नमः,इति नमस्कृत्य ध्यायेत्-

[१०]सूर्येन्द्वग्निमयैकपीठनिलयां बालार्कबिम्बारुणां
त्र्यक्षां चन्द्रकलावतंसमुकुटां पीनस्तनीं सुन्दरीम् ।
पाशं चाङ्कुशमिक्षुचापविधृतां पुष्पेषु हस्तां परां ॥
नानाभूषणभूषितातिसुकुमाराङ्गीं भजे चैन्दवे ॥इति ध्यात्वा

CC-0. Nepal Sanskrit Academy, Kathmandu.

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उद्घाटनाख्यकवचं पठेत्:-

अथोद्घाटनकवचम्

देवाधिदेव देवेश चक्रेश्वर्याः पुरा प्रभो ॥
कवचं सूचितं यत्तत् कथयस्व सुरेश्वर ॥१॥
श्रीशिव उवाच ॥
शृणु देवि प्रवक्ष्यामि कवचं भुवि मुक्तिदम् ॥
सुरासुरोरगादीनामलभ्यं भुवनत्रये ॥२॥
ॐ मूलाधारे स्थिता देवी त्रिपुरा चक्रनायिका ॥
नृजन्मभीतिनाशार्थं सावधाना सदास्तु मे ॥३॥
स्वाधिष्ठानाख्यचक्रस्था देवी श्रीत्रिपुरेशिनी ॥
पशुबुद्धिं नाशयित्वा सर्वैश्वर्यप्रदाऽस्तु मे ॥४॥
मणिपूरे स्थिता देवी त्रिपुरेशीति विश्रुता ॥
स्त्रीजन्मभीतिनाशार्थं सावधाना सदाऽस्तु मे ॥५॥
स्वस्तिके संस्थिता देवी श्रीमत्त्रिपुरसुन्दरी ॥
शोकभीतिपरित्रस्तं पातु मामनघा सदा ॥६॥
अनाहताख्यनिलया श्रीमत्त्रिपुरवासिनी ॥
अज्ञानभीतितो रक्षां विदधातु सदा मम ॥७॥
त्रिपुराश्रीरिति ख्याता विशुद्धाख्यस्थलस्थिता ॥
जरोद्भवभयात् पातु पावनी परमेश्वरी ॥८॥
आज्ञाचक्रस्थिता देवी त्रिपुरामालिनी तु या ॥
सा मृत्युभीतितो रक्षां विदधातु सदा मम ॥९॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ललाटपद्मसंस्थाना सिद्धा या त्रिपुरादिका ॥
सा पातु पुण्यसंभूतिभीतिसंघात् सुरेश्वरी ॥१०॥
त्रिपुराम्बेति विख्याता शिरःपद्मे सुसंस्थिता ॥
सा पापभीतितो रक्षां विदधातु सदा मम ॥११॥
ये पराम्बापदस्थनगमने विघ्नसंचयाः ॥
तेभ्यो रक्षतु योगेशी सुन्दरी सकलार्तिहा ॥१२॥
उद्घाटनाख्यं कवचं मयोक्तं यत् सुरेश्वरी ॥
देव्याः प्रसादरोषोत्थोद्घाटनानन्ददायकम् ॥१३॥
इति श्रीरुद्रयामलोक्तमुद्घाटनाख्यं कवचं संपूर्णम् ।

मूलाधार स्थितां प्रसुप्तभुजगाकारां सार्धत्रिवलयोपेताम् आधारादि-मूलाधारब्रह्मरन्ध्रान्तमुललसन्तीं बिसतन्तुतनीयसीं विद्युत्कोटीप्रभां परदेवतामयीं श्यामवर्णां कुण्डलिनीं ध्यात्वा तत्प्रभया श्यामीभूतं जगद् विभाव्य ताम् ॐ हूँ हं सः इति मन्त्रेण सुषुम्णामार्गे-णोत्थाप्य क्रमशः षट् चक्राणि भित्वा ब्रह्मरन्ध्रं नयेत् । तत्र सह-स्रदलकमलकर्णिकामध्यगतेन परमशिवेन सह सामरस्यं विभाव्य तदुत्थसुधावृष्ट्या देवतां प्रीणयित्वा कंचित्कालं तत्रैव लयं विभाव्य सुधास्रोतःस्वरूपिणीं कुण्डलिनीं सोहमिति मन्त्रेणावरोह्य बिन्दुनादाज्ञाविशुद्ध्यनाहतमणिपूरस्वाधिष्ठानमूलाधारचक्रेषु क्रमेण अकुलामृतपूरेण सुषुम्णावर्त्मना तत्तदाधारचक्राणि प्लावयन्तीं कुण्डलिनीं मूलाधारचक्रम् प्रापय्य तत्रैव स्वस्थाने स्थापयित्वा ध्यायेत् —

प्रकाशमानां प्रथमे प्रयाणे प्रतिप्रयाणेऽप्यमृतायमानाम् ॥
अन्तःषडध्वामनुसंचरन्तीमानन्दरूपामबलां प्रपद्ये ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ ह्रीँ ह्रीँ वज्रवैरोचनीये हूँ हूँ स्वाहा छिन्नमस्तायै नमः इति कुण्डलिनीं योनिमुद्रया नमस्कुर्यात् । इति कुण्डलिन्या आरोहावरोहक्रमः ।

अथ मन्त्रयोगः

मूलाधारे वह्निमण्डलं तत्र वाग्भवकूटं स्फुरत्तडिल्लताभास्वरम् अनाहतपर्यन्तप्राप्तनादशिखं जाग्रदवस्थात्मकं विशुद्धमयं प्रकृत्यादिपृथिव्यन्तचतुर्विंशतितत्त्वात्मकं ध्यात्वा अनाहतचक्रे सूर्यमण्डलं तत्र कामराजकूटम उद्यदादित्यसंकाशम् आज्ञापर्यन्तप्राप्तशिखम्, ऊर्ध्वाधोरश्मिकं स्वप्नावस्थात्मकं शुद्धाशुद्धमयं मायादिपुरुषान्तसप्ततत्त्वात्मकं सूक्ष्मदेहम् अनिच्छामयं ध्यात्वा आज्ञाचक्रे चन्द्रमण्डलं तत्र शक्तिकूटं शशिप्रभं ब्रह्मरन्ध्रान्तगतचिच्चन्द्रमण्डलपर्यन्तप्राप्तनादशिखं सुषुप्त्यवस्थात्मकं शुद्धमयं शिवादिशुद्धविद्यान्तपञ्चतत्त्वात्मकं परदेहकारणदेहपरेच्छामयं ध्यात्वा मूलाधारादिब्रह्मरन्ध्रान्तम् उद्यद्दिनकरसहस्रभास्वरां तेजोदण्डमयीं तुरीयावस्थामयीं शिवादिपृथिव्यन्तषट्त्रिंशत्तत्त्वात्मिकां ध्यात्वा तत्तेजसा स्वदेहं व्याप्तं विभाव्य तत्तेजसा परिणतां श्रीपरदेवतां हृदयकमले भावयित्वा मानसोपचारैः पूजयेत्

पूजयेत् परया भक्त्या मानसैरुपचारकैः ।
हृत्पद्ममासनं दद्यात् सहस्रारच्युतामृतैः ॥
पाद्यं चरणयोर्दद्यान् मनस्त्वर्घ्यं निवेदयेत् ।
तेनामृतेनाचमनं स्नानीयमपि कल्पयेत् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आकाशतत्त्वं वसनं गन्धस्तु गन्धतत्त्वकम् ।
चित्तं प्रकल्पयेत्पुष्पं धूपं प्राणान् प्रकल्पयेत् ॥
तेजस्तत्वं तु दीपार्थे नैवेद्यं तु सुधाम्बुधिम् ।
अनाहतध्वनिं घण्टां वायुतत्त्वं तु चामरम् ॥
नृत्यमिन्द्रियकर्माणि चाञ्चल्यं मनसस्तथा ।
पुष्पं नानाविधं दद्यादात्मनो भावसिद्धये ॥
अमायामनहंकारमरागममदं तथा ।
अमोहकमदम्भश्च ह्यद्रोहाक्षोभकौ तथा ॥
अमात्सर्यमलोभश्च दशपुष्पं विदुर्बुधाः ।
अहिंसा परमं पुष्पं पुष्पमिन्द्रियनिग्रहः ॥
दयाक्षमाज्ञानरूपं पञ्चपुष्पं ततः परम् ॥
तैः पञ्चदशभिः पुण्यैर्भावरूपैः प्रपूजयेत् ॥
सुधाम्बुधिं मांससैलं भर्जितं मीनपर्वतम् ।
मुद्राराशिं सुभक्तं च घृताक्तं पायसं तथा ॥
कुलामृतं च तत्पुण्यं पीठक्षालनवारि च ।
कामक्रोधौ विघ्नकृतौ बलिं दत्वा च प्राशयेत् ॥
भुञ्जानां देवतां ध्यात्वा होमं मानसिकं चरेत् ।

अहंकारासत्यपैशुन्यकामक्रोधलोभमोहमदमात्सर्यादिरूपं हविः मनोरूपं स्रुचं सुषुम्णारूपं स्रुवं परिकल्प्य मूलाधारे आत्मान्तरात्मपरमात्मज्ञानात्मरूपं चतुष्कोणमग्निकुण्डं विचिन्त्य तत्र कुण्डलिनीरूपं प्रज्वलद्वह्निं ध्यात्वा मनसैव मूलमुच्चार्य तदन्ते

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ धर्माधर्महविर्दीप्ते स्वात्माग्नौ मनसा स्रुचा ।
सुषुम्णावर्त्मना नित्यमक्षवृत्तीर्जुहोम्यहम् ॥

ॐ पुण्यं जुहोमि स्वाहा, एवं पापं जुहोमि स्वाहा, एवं कृत्यं जुहोमि स्वाहा, एवंम् अकृत्यं जुहोमि स्वाहा, एवं संकल्पं जुहोमि स्वाहा, एवं विकल्पं जुहोमि स्वाहा, एवं ॐ धर्मं जुहोमि स्वाहा, इति सप्ताहुतीर्हुत्वा पूर्णाहुतिं कुर्यात्—

ॐ अन्तर्निरन्तरनिरन्धनमेधमाने
मोहान्धकारपरिपन्थिनि संविदग्नौ ॥
कस्मिञ्चिदद्भुतमरीचिविकाशभूमौ
चितं जुहोमि वसुधादि शिवावसानम्॥
ॐ प्रकाशामर्शहस्ताभ्यामवलम्ब्योन्मनीस्रुचम् ।
धर्माधर्मकलाशेषं पूर्णवह्नौ जुहोम्यहम ॥

ॐ अधर्मं जुहोमि स्वाहा, इति मानसि कहोमं विधाय देवीं तृप्तां ज्ञात्वा हस्तप्रक्षालनादिकं कारयित्वा वस्त्रादिना मुखादिकं मार्जयित्वा मूलमन्त्रस्य ऋष्यादिकरषडङ्गन्यासं विधाय यथाशक्ति मूलं गायत्रीं च जपित्वा गुह्येति जपं निवेदयेत्, प्रातः स्तुतिं च पठेत् ।

प्रातर्नमामि जगतां जनन्याश्चरणाम्बुजम् ।
हरिर्हरो विरिञ्चिश्च सृष्ट्यादीन् कुरुते यया ॥१॥
प्रातस्त्रिपुरसुन्दर्या नमामि पादपङ्कजम् ।
यत्पाद्यमम्बु शिरसि भावि गङ्गा महेशितुः ॥२॥
प्रातः पाशाङ्कुशशरचापहस्तां नमाम्यहम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उद्यदादित्यसंकाशां श्रीमत्त्रिपुरसुन्दरीम् ॥३॥
प्रातर्नमामि पादाब्जं येनेदं भासते जगत् ।
तस्यास्त्रिपुरसुन्दर्या यत्प्रसादान्निवर्तते ॥४॥
यः श्लोकपञ्चकमिदं प्रातर्नित्यं पठेन्नरः ।
तस्मैदद्यादात्मपदं श्रीमत्त्रिपुरसुन्दरी ॥५॥

प्रातः स्मरामि शरदिन्दुकरोज्ज्वलाभां
सद्रत्नवन्मकरकुण्डलहारभूषाम् ॥
दिव्यायुधोर्जितसुनीलसहस्रहस्तां
रक्तोत्पलाभचरणां भवतीं परेशाम् ॥
प्रातर्नमामि महिषासुरचण्डमुण्ड—
शुम्भासुरप्रमुखदैत्यविनाशदक्षाम् ॥
ब्रह्मेन्द्ररुद्रमुनिमोहनशीललोलां
चण्डीं समस्तसुरमूर्तिमनेकरूपाम् ॥
प्रातर्भजामि भजतामभिलाषदात्रीं
धात्रीं समस्तजगतां दुरितापहन्त्रीम् ॥
संसारबन्धनविमोचनहेतुभूतां
मायां परां समाधिगम्य परस्य विष्णोः ॥
श्लोकत्रयमिदं देव्याश्चण्डिकायाः पठेन्नरः ।
सर्वान्कामानवाप्नोति विष्णुलोके महीपतेः ॥

शिवस्य—

प्रातः स्मरामि भवभीतिहरं सुरेशं
गङ्गाधरं वृषभवाहनमम्बिकेशम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

खट्वाङ्गशूलवरदाभयहस्तमीश
ससाररोगहरमौषधमद्वितीयम् ॥
प्रातर्नमामि गिरिशं गिरिजार्धदेहं
सर्गस्थितिप्रलयकारणमादिदेवम् ॥
विश्वेश्वर विजितविश्वमनोभिरामं
ससाररोगहरमौषधमद्वितीयम् ॥
प्रातर्भजामि शिवमेकमनन्तमाद्यं
वेदान्तवेद्यमखिलं पुरुष महान्तम् ॥
नामादिभेदरहित षडभावशून्यं ।
संसाररोगहरमौषधमद्वितीयम ॥
प्रातः समुत्थाय शिवं विचिन्त्य
श्लोकत्रयं येनुदिनं स्मरन्ति ॥
ते दुःखजात बहुजन्मसंचितं
हित्वा पदं यान्ति तदेव शम्भोः ॥

गणेशस्य—

प्रातः स्मरामि गणनाथमनाथबन्धुं
सिन्दूरपूरपरिशोभितगण्डयुग्मम् ॥
उद्दण्डविघ्नपरिखण्डनचण्डदण्ड-
माखण्डलादिसुरनामकवृन्दवन्द्यम् ॥
प्रातर्नमामि चतुराननवन्द्यमान-
मिच्छानुकूलमखिलं च वरं ददानम् ॥
तं तुन्दिलं द्विरसनाधिपयज्ञसूत्रं
पुत्रं विलासचतुरं शिवयोः शिवाय ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रातर्भजाम्यभयदं खलु भक्तशोक—
दावानलं गणविभुं वरकुञ्जरास्यम् ॥
अज्ञानकाननविनाशनहव्यवाह—
मुत्साहवर्धनमहं सुतमीश्वरस्य ॥

श्लोकत्रयमिदं पुण्यं सदा साम्राज्यदायकम् ।
प्रातरुत्थाय सततं यः पठेत्प्रयतः पुमान् ॥

सूर्यस्य—

प्रातःस्मरामि खलु तत्सवितुर्वरेण्यं
रूपं हि मण्डलमृचोथ तनुर्यजूंषि ॥
सामानि यस्य किरणाः प्रभवादिहेतुं
ब्रह्माहरात्मकमलक्ष्यमचिन्त्यरूपम् ॥
प्रातर्नमामि तरणि तनुवाङ्मनोभि—
र्ब्रह्मेन्द्रपूर्वकसुरैर्नुतमर्चितं च ॥
वृष्टिप्रमोचनविनिग्रहहेतुभूतं
त्रैलोक्यपालनपरं त्रिगुणात्मकं च ॥
प्रातर्भजामि सवितारमनन्तशक्तिं
पापौघशत्रुभयरोगहरं परं च ॥
तं सर्वलोककलनात्मककालमूर्तिं
गोकण्ठबन्धनविमोचनमादिदेवम् ॥

श्लोकत्रयमिदं भानोः प्रातः प्रातः पठेत्तु यः ।
स सर्वव्याधिनिर्मुक्तः परं सुखमवाप्नुयात् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

विष्णोः :-

प्रातः स्मरामि भवभीतिमहार्तिशान्त्यै
नारायणं गरुडवाहनमब्जनाभम् ।
ग्राहाभिभूतवरवारणमुक्तिहेतुं
चक्रायुधं तरुणवारिजपत्रनेत्रम् ॥
प्रातर्नमामि मनसा वचसा च मूर्ध्ना
पादारविन्दयुगलं परमस्य पुंसः ।
नारायणस्य नरकार्णवतारणस्य
पारायणप्रवणविप्रपरायणस्य ॥
प्रातर्भजामि भजतामभयंकरं तं
प्राक्सर्वजन्मकृतपापभयापहत्यै ।
यो ग्राहवक्त्रपतिताङ्घ्रिगजेन्द्रघोर-
शोकप्रणाशनकरो धृतशङ्खचक्रः ॥
श्लोकत्रयमिदं पुण्यं प्रातः प्रातः पठेन्नरः ।
लोकत्रयगुरुस्तस्मै दद्यादात्मपदं हरिः ॥

परब्रह्मण :-

प्रातः स्मरामि हृदि संस्फुरदात्मतत्त्वं
सच्चित्सुखं परमहंसगतिं तुरीयम् ।
यत्स्वप्नजागरसुषुप्तिमवैति नित्यं
तं सर्वभूतहृदयं न च भूतसङ्घः ॥
प्रातर्नमामि मनसा वचसामगम्यं
वाचो विभान्ति निखिला यदनुग्रहेण ।
यन्नेतिनेतिवचनैर्निगमा अवोचु-
स्तं देवदेवमजमच्युतमाहुरग्र्यम् ॥
प्रातर्भजामि तमसः परमर्कवर्णं
पूर्णं सनातनपदं पुरुषोत्तमाख्यम् ॥
यस्मिन्निदं जगदशेषमशेषमूर्तौ
रज्ज्वां भुजङ्गम इव प्रतिभासितं वै ॥
श्लोकत्रयमिदं पुण्यं त्रैलोक्यस्य हितावहम् ।
यः पठेत् प्रातरुत्थाय सोऽभीष्टं फलमाप्नुयात् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

लक्ष्म्याः :—

कान्त्या काञ्चनसंनिभां हिमगिरिप्रख्यैश्चतुर्भिर्गजै-
र्हस्ताक्षिप्तहिरण्मयामृतघटैरासिच्यमानां श्रियम् ॥
बिभ्राणां वरमब्जयुग्मभयं हस्तैः किरीटोज्ज्वलां
क्षौमाबद्धनितम्बभागललितां वन्देऽरविन्दस्थिताम् ॥

वराहस्य :—

आपादं जानुदेशात्कनकमिव हिमप्रख्यमा जानु नाभेः
कण्ठादानाभि वह्निप्रभमथ शिरसश्चागलं नीलवर्णम् ॥
मौलेर्व्योमाभमाकं वरलसदरिशङ्खासिखेटं गदाढ्यं
शक्त्याऽभीत्या च युक्तं प्रणमत वसुधोल्लासिदंष्ट्रं वराहम्॥

ग्रहाणाम् :—

ब्रह्मा मुरारिस्त्रिपुरान्तकारी भानुः शशी भूमिसुतो बुधश्च।
गुरुश्च शुक्रः शनिराहुकेतवः कुर्वन्तु सर्वे मम सुप्रभातम्॥

सुपर्णस्यः —

समस्तसामध्वनिरूपधारिणे परेष्ठिनो वाहनकर्मकारिणे ।
विषस्य पापस्य सदापहारिणे नमः सुपर्णाय शमप्रदायिने॥

ऋषीणाम् :—

भृगुर्वसिष्ठः क्रतुरङ्गिराश्च मनुः पुलस्त्यः पुलहश्च गौतमः।
रैभ्यो मरीचिश्च्यवनश्च दक्षःकुर्वन्तु सर्वे मम सुप्रभातम्॥
सनत्कुमारः सनकः सनन्दनः सनातनोप्यासुरिपिङ्गलौ च ।
सप्त स्वराः सप्त रसातलानि कुर्वन्तु सर्वे मम सुप्रभातम्॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सप्तार्णवाः सप्त कुलाचलाश्च सप्तर्षयो द्वीपवनानि सप्त ।
भूरादिकृत्वा भुवनानि सप्त कुर्वन्तु सर्वे मम सुप्रभातम् ॥
पृथ्वी सगन्धा सरसास्तथापःस्पर्शी च वायुर्ज्वलनं च तेजः।
नभः सशब्दं महता सहैव कुर्वन्तु सर्वे मम सुप्रभातम् ॥
इत्थं प्रभाते परमं पवित्रं पठेत् स्मरेद् वा शृणुयाच्च तद्वत्।
दुःस्वप्ननाशस्त्विह सुप्रभातं भवेच्च नित्यं भगवत्प्रसादात्॥

पुण्यश्लोकानाम् :—

पुण्यश्लोको नलो राजा पुण्यश्लोको युधिष्ठिरः ।
पुण्यश्लोका च वैदेही पुण्यश्लोको जनार्दनः ॥
अश्वत्थामा वलिर्व्यासो हनूमाँश्च विभीषणः ।
कृपः परशुरामश्च मार्कण्डेयः कयाधुजः ॥
प्रातः प्रातः स्मरेन्नित्यं य एतांश्चिरजीवनान् ।
आयुरारोग्यमतुलं लभते नात्र संशयः ॥
अहल्या द्रौपदी कुन्ती तारा मन्दोदरी तथा ।
पञ्चकन्याः स्मेरन्नित्यं महापातकनाशनम् ॥
अविमुक्तचरणयुगलं दक्षिणमूर्तेश्च कुक्कुटचतुष्कम् ।
स्मरणमपि वाराणस्या निहन्ति दुःस्वप्नमपशकुनं च ॥

अनेकदेवतास्तुति :—

उमा उषा च वैदेही रमा गङ्गेति पञ्चकम् ।
प्रातरेव पठेन्नित्यं सौभाग्यं वर्धते सदा ॥
सोमनाथो वैद्यनाथो धन्वन्तरिरथाश्विनौ ।
पञ्चैतान् यः स्मरेन्नित्यं व्याधिस्तस्य न बाधते ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कपिलः कालियो ऽनन्तो वासुकिस्तक्षकस्तथा ।
पञ्चैतान् संस्मरेन्नित्यं विषबाधा न बाधते ॥
हरं हरिं हरिश्चन्द्रं हनूमन्तं हलायुधम् ।
पञ्चकं वै स्मरेन्नित्यं घोरसंकटनाशनम् ॥
रामं स्कन्दं हनूमन्तं वैनतेयं वृकोदरम् ।
पञ्चैतान् संस्मरेन्नित्यं भवबाधा विनश्यति ॥
आदित्यश्च उपेन्द्रश्च चक्रपाणिर्महेश्वरः ।
दण्डपाणिः प्रतापी स्यात् क्षुद्बाधा च न बाधते ॥
वसुर्वरुणसोमौ च सरस्वती च सागरः ।
पञ्चैतान् संस्मेरद् यत्र तृषा तत्र न बाधते ॥
सनत्कुमारदेवर्षिशुकभीष्मप्लवंगमाः ।
पञ्चैतान् स्मरतो नित्यं कामस्तस्य न बाधते ॥
रामलक्ष्मणौ सीता च सुग्रीवो हनुमान् कपिः ।
पञ्चैतान् स्मरतो नित्यं महाबाधा प्रमुच्यते ॥
कर्कोटकस्य नागस्य दमयन्त्या नलस्य च ।
ऋतुपर्णस्य राजर्षेः कीर्तनं कलिनाशनम् ॥
कार्तवीर्यार्जुनो नाम राजा बाहुसहस्रवान् ।
तस्य स्मरणमात्रेण गतं नष्टं च लभ्यते ॥
भारतस्योत्तरे भागे हिमवान् नाम पर्वतः ।
तस्य दर्शनतो भूयान्नराणां धृतिरुत्तमा ॥
मुक्तिक्षेत्राद् विनिष्क्रान्ता गण्डकी लोकपावनी ।
तज्जलस्पर्शमात्रेण नरो मोक्षमवाप्नुयात् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नेपाले वाग्वतीतीरे दृष्ट्वा पशुपतिं शिवम् ।
पशुपाशविनिर्मुक्तो नरो भवति निश्चितम् ॥

प्रल्हादनारदपराशरपुण्डरीक-
व्यासाम्बरीषशुकशौनकभीष्मदाल्भ्यान् ॥
रुक्माङ्गदार्जुनवसिष्ठविभीषणादीन्
पुण्यानिमान् परमभागवतान्नमामि ॥

धर्मो विवर्धति युधिष्ठिरकीर्तनेन
पापं प्रणश्यति वृकोदरकीर्तनेन ॥
शत्रुर्विनश्यति धनंजयकीर्तनेन
माद्रीसुतौ कथयतां न भवन्ति रोगाः ॥

काश्यां वै भैरवो देवः संसारभयनाशनः ।
अनेकजन्मजं पापं स्मरणेन विनश्यति ॥
वाराणस्यां पूर्वभागे व्यासो नारायणः स्वयम् ।
तस्य स्मरणमात्रेन अज्ञानी ज्ञानवान् भवेत् ॥
वाराणस्यां परे भागे भीमचण्डी महासती ।
तस्याः स्मरणमात्रेण विजयी भव सर्वदा ॥
वाराणस्यामुत्तरे तु सुमन्तुर्नाम वै द्विजः ।
तस्य स्मरणमात्रेण निर्धनो धनवान् भवेत् ॥
वाराणस्यां दक्षिणे तु कुक्कुटो नाम ब्राह्मणः ।
तस्य स्मरणमात्रेण दुःस्वप्नः सुखदो भवेत् ॥
विश्वेशं माधवं ढुण्ढीं दण्डपाणिं च भैरवम् ।
वन्दे काशीं गुहां गङ्गां भवानीं मणिकर्णिकाम् ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अयोध्या मथुरा माया काशी काञ्ची अवन्तिका ।
पुरी द्वारावती चैव सप्तैता मोक्षदायिकाः ॥
मार्तण्डतिलकस्वामिमहागणपतीन् वयम् ।
विश्ववन्द्यान् नमस्यामः सर्वसिद्धिविधायिनः ॥
प्रातः प्रभृतिसायान्तं सायादि प्रातरन्ततः ।
यत् करोमि महादेवि तदस्तु तव पूजनम् ॥
अहं देवी च नान्योऽस्मि ब्रह्मैवाहं न शोकभाक् ।
सच्चिदानन्दरूपोऽहं नित्यमुक्तस्वभाववान् ॥
त्वमेवाहमहं त्वं च संविन्मात्रवपुः स्वयम् ।
आवयोरन्तरं देवि न स्यादाज्ञाबलात्तव ॥
अहं तीर्णो भवं घोरं कृत्यं किञ्चिन्न मेऽस्ति हि ।
तथापि देहि मे देवि आज्ञां तव निषेवणे ॥
त्रैलोक्यचैतन्यमयादिदेवि सुन्दर्यपर्णे भवदाज्ञयैव ॥
प्रातःसमुत्थाय तव प्रियार्थं संसारयात्रामनुवर्त्तयिष्ये ॥
संसारयात्रामनुवर्तमानं त्वदाज्ञया श्रीत्रिपुरे परेशि ।
स्पर्धातिरस्कारकलिप्रमादभयानि मां माभिभवन्तु देवि ॥

जानामि धर्मं न च मे प्रवृत्तिर्जानाम्यधर्मं न च मे निवृत्तिः ।
त्वया ऋषीकेशि हृदिस्थयाहं यथा नियुक्तोस्मि तथा करोमि॥

गुरुदैवतमन्त्रेषु विष्णुधात्रीशिवेषु च ।
तत्र मे भेदबुद्धिर्नो भूयाद् भो सिंहवाहिनि॥

इत्यादि स्वस्वागमानुसारं यथायथं प्रातःस्तुतिं विधाय अजपाविधिं कुर्यात् । स चेत्थम् :—

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अजपाविधिः

१ अजपानाम गायत्री योगिनां सिद्धिदायिनी ।
यस्याः संकल्पमात्रेण सर्वपापैः प्रमुच्यते ॥

२ हंसहंसेति यो ब्रूयाद् हंसो नाम सदा शिवः ।
तं हंसं तत्वसंयुक्तं यस्तं वेद स वेदवित् ॥

३ हकारेण बहिर्याति सकारेण विशेत् पुनः ।
हंस हंसेत्यमुं मन्त्रं जीवो जपति सर्वदा ॥

४ (१) शतान्यष्टौ दिवारात्रं सहस्राणि दशैव तु ।
निश्वासोच्छ्वासरूपेण जपसंख्या भवेद् ध्रुवम् ॥

५ तत्संकल्पविहीनानां निष्फलः स्याज्जपस्त्वयम् ।
संकल्पात् सिद्धिमाप्नोति नरो मोक्षप्रदायिनीम् ॥

६ तस्मात् संकल्पयेद् धीमान् हृदये श्रद्धयान्वितः ।
अजपानाम गायत्रीजपोऽयं तद्विधानतः ॥

अथातो हंसरूपं व्याख्यास्यामः-अग्नीषोमौ पक्षौ । ॐ कारः शिरः । विन्दुस्त्रिनेत्रम् । रुद्रो मुखम । मनो विष्णुः। ब्रह्मा नाभिः । शिवश्चरणौ । सूर्यश्चाग्निश्चोभयपार्श्वे । एवमसौ परमहंस इति । [केचित्तु आगमनिगमौ पक्षौ । ॐ कारश्चञ्चुः । कामकला कण्ठम् ..... ह्यौ स्हौ पादौ । ज्ञानमयं शरीरम् इत्याहुः ।]

---

(१) वेदनिरपेक्षतन्त्रानुसारिणस्तु—षट् शतानि दिवारात्रौ सहस्राण्येकविंशतिम इति पठन्ति अतस्तेषामजपासंख्या वेदोक्तख्यातो द्विगुणा भवति ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्राणानायस्य ॐ अस्य श्रीअजपानामब्रह्मविद्यागायत्रीमन्त्रस्य हंस ऋषिरव्यक्तगायत्रीच्छन्दः परहंसो देवता हं वीजं सःशक्ति सोऽहं कीलकं प्रणवस्तत्त्वं नभःस्थानम्, हैमवर्णमुदात्तः स्वरः मोक्षार्थे विनियोगः । शिरसि ॐ हंसाय ऋषये नमः । मुखे ॐ अव्यक्तगायत्रीच्छन्दसे नमः । हृदि ॐ परम-हंसाय देवतायै नमः । गुह्ये ॐ हं वीजाय नमः । पदोः ॐ सःशक्तये नमः । नाभौ ॐ सोहं कीलकाय नमः । सर्वाङ्गे ॐ तत्त्वाय नमः । मुखे ॐ उदात्तस्वरायनमः । [ॐकारतत्त्वाय नमो हृदये । नभसे स्थानाय नमः शिरसि । उदात्तस्वराय नमः कण्ठे । हैमवर्णाय नमः सर्वाङ्गे] मुक्तिसाधने जपे विनियोगः । ॐ स्हाँ सूर्यात्मने अङ्गुष्ठाभ्यां नम । ॐ ह्सीं सोमात्मने तर्जनीभ्यां स्वाहा । ॐ ह्सूँ निरञ्जनात्मने मध्यमाभ्यां वषट् । ॐ ह सैँ निराभासात्मने अनामिकाभ्यां हूँ, ॐ हसौं अव्यक्तात्मने कनिष्ठिकाभ्यां वौषट् । ह् सँः अनन्तात्मने करतलकरपृष्ठाभ्यां फट् । ॐ ह् साँ सूर्यात्मने हृदयाय नमः। ॐ ह्सीं सोमात्मने शिरसे स्वाहा । ॐ ह सूँ निरञ्जनात्मने शिखायै वषट् । ॐ ह्सैं निराभासात्मने कवचाय हूँ । ॐ ह् सौं अव्यक्तात्मने नेत्राभ्यां वौषट् । ॐ ह् सँः अनन्तात्मने अस्त्राय फट् । [ॐ परो हृदयाय नमः । ॐ रजसे शिरसे स्वाहा । ॐ सावदों शिखायै वषट् । ॐ परः कवचाय हूँ । ॐ रजसे नेत्राभ्यांवौषट । ॐ सावदोम् अस्त्राय फट् ।]

इति विन्यस्य ध्यायेत्-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

[गमागमस्थं गमनादिशून्यंसच्चित्प्रकाशं तिमिरान्तकारम् ।
पश्याम्यहं सर्वजगत्प्रधानं नमामि हंसं परमात्ममूर्तिम् ॥
द्यां मूर्धानं यस्य विप्रा वदन्ति खं वै नाभिं चन्द्रसूर्यौ च नेत्रे ॥

दिशः श्रोत्रे यस्य पादौ क्षितिश्च ध्यातव्योऽसौ सर्वभूतान्तरात्मा ॥

हृदयकमलमध्ये सूर्यबिम्बासनस्थं
निखिलभुवनबीजं सृष्टिसंहारहेतुम् ।
अनतिशयसुखाढ्यं ज्योतिषं हंसरूपं
विततभुवनभावं चिन्तयेदात्मरूपम् ॥

अग्नीषोमगरुद्द्वयं प्रणवकं बिन्दुत्रिनेत्रोज्ज्वलं
भास्वद्रुद्रमुखं शिवाङ्घ्रियुगलं पार्श्वस्थकालानलम् ।
उद्यद्भास्करकोटिकान्तिसदृशं हंसं जगद्व्यापिनं
नित्यानन्दमयं हृदम्बुजकुटीनीडे सदा भावयेत् ॥
इति ध्यात्वा मानसोपचारैः पूजयेत् ।

ॐ लं पृथिव्यात्मने गन्धतन्मात्रप्रकृत्यानन्दात्मकाय परमेश्वराय नमः गन्धं परिकल्पयामि । ॐ हं आकाशात्मने शब्दतन्मात्रप्रकृत्यानन्दात्मकाय परमेश्वराय वौषट् पुष्पं समर्पयामि । ॐ यं वाय्वात्मने स्पर्शतन्मात्रप्रकृत्यानन्दात्मकाय परमेश्वराय हूँ धूपं समर्पयामि । ॐ रं तैजसात्मने रूपतन्मात्रप्रकृत्यानन्दात्मने-परमेश्वराय वषट् दीपं समर्पयामि । ॐ वं अमृतात्मने रसतन्मात्रप्रकृत्यानन्दात्मकाय परमेश्वराय स्वाहा नैवेद्यं समर्पयामि । ॐ शंशक्त्यात्मने सर्वप्रकृत्यानन्दात्मकाय परमेश्वराय फट् ताम्बूलं समर्पयामि । एवं सम्पूज्य यथाशक्ति हंसगायत्रीं जपेत् । यथा-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भूर्भुवः स्वः हंसहंसाय विद्महे, सोऽहं हंसः सधीमहि। तन्नो हंसः प्रचोदयात्। ॐ निरञ्जनाय विद्महे निराभासाय धीमहि अतनुसूक्ष्मः प्रचोदयात् ॥ अग्नीषोमाभ्यां वौषट्। हंस इति पञ्चविंशतिवारं जपित्वा समर्पयेत्।

तदेवं यथाः-...गोत्र...शर्माहं पूर्वेद्युः सूर्योदयामारभ्य अद्य सूर्योदयपर्यन्तं जातो निश्वासोच्छ्वासरूपो योऽजपाजपः अष्टशताधिकदशसहस्रसंख्याकः तं तत्तद्देवताभ्यो यथाभागं निवेदयामि।

आधारचक्रे :—

व श ष स दलमध्ये सम्यगाधारपद्मे
तरुणमरुणगात्रं वारणास्यं त्रिनेत्रम् ॥
अभयवरदहस्तं चारुपाशाङ्कुशाढ्यं
पशुपतिसुतमीशं चिन्तयेद्विघ्नराजम् ॥

ॐ गणानां त्वा गणपति ठं हवामहे प्रियाणां त्वा प्रियपति ठं हवामहे निधीनां त्वा निधिपति ठं हवामहे वसो मम। आहमजानिगर्भधमात्वमाजासिगर्भधम्। ॐ गंगणपतये नमः। कनकाभ वं शं षं सं युतचतुर्दलपृथ्वीतत्त्वात्मकमूलाधारकमलकर्णिकायां त्रिकोणे स्थिताय रक्तवर्णाय गजवदनाय त्रिनेत्राय पाशाङ्कुशवराभयहस्ताय सिद्धिबुद्धिसहिताय गणेशाय त्रिशतमजपाजपं निवेदयामि।

स्वाधिष्ठानचक्रे लिङ्गमूले —

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व भ म य र ल संज्ञैरक्षरैः षट्कपत्रे
सुमुखसुखनिविष्टं पङ्कजे पद्मयोनिम् ।
अभयवरदहस्तं कुण्डिकामक्षमालां
दधतमनलभासं चिन्तयेद् दिव्यमूर्तिम् ॥
ॐ ब्रह्म जज्ञानं प्रथमं पुरस्ताद् विसीमतः सुरुचोवेन आवः ।
सबुध्न्या उपमा अस्य विष्ठा सतश्चयोनि मसतश्च विव्वः ॥

ॐ हं ब्रह्मणे नमः । बालार्कसदृशबं भं मं यं रं लं युतषड्दलरस-तत्त्वात्मक-स्वाधिष्ठानकमलकर्णिकास्थिताय रक्तवर्णाय चतुराननाय वराभयक्रमण्डलुजपमालाहस्ताय सरस्वतीशक्तिसहिताय ब्रह्मणे त्रिसहस्रमजपाजपं निवेदयामि नमः ।

मणिपूरचक्रे-नाभौ—

डाद्यैः फान्तगतैः प्रकल्पितदले पद्मे निविष्टं हरिं
मार्तण्ड्द्युतिकोटिभासुरतनुं नारायणं चिन्तयेत् ॥
आत्ताम्भोजगदारिशङ्खममलं पीताम्बरं कौस्तुभ-
श्रीवत्साङ्कितहारनूपुरकिरीटाद्यैरतीवोऽज्ज्वलम् ॥

ॐ क्लीँ विष्णवे नमः । ॐ तद् विष्णोः परमं पद ठं सदा पश्यन्ति सूरयः । दिवीव चक्षुराततम् ॥ इन्द्रनीलसदृशं डं ढं णं तं थं दं नं पं फं युतदशदलतेजस्तत्वात्मकमणिपूरकमलकर्णिकास्थिताय इन्द्रनीलवर्णाय शङ्खचक्रगदापद्महस्ताय कौस्तुभवनमाला-श्रीवत्स-धराय लक्ष्मीसहिताय विष्णवे त्रिसहस्रमजपाजपं निवेदयामि ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनाहतचक्रे हृदि —

काद्यैष्ठान्तगतैः प्रकल्पितदले पङ्केरुहे पार्वती-
युक्तं शङ्करमिन्दुकोटिसदृशप्रख्यं कपर्दोज्ज्वलम् ॥
खट्वाङ्गं डमरुं पिनाकत्रिशिखैर्युक्तं परं शाश्वतं
नीलग्रीवशशाङ्कशेखरमजं चर्माम्बरं चिन्तयेत् ॥

ॐ यो रुद्रो अग्नौ यो अप्सु य ओषधीषु । यो रुद्रो विश्वा भुवना विवेश तस्मै रुद्राय नमो नमः ॥ ॐ ह्रौँ रुद्राय नमः इन्द्रगोपसदृश-कं खं गं घं ङं चं छं जं झं ञं टं ठं युतद्वादशदल-वायुतत्त्वात्मकानाहतकमलकर्णिकास्थिताय शुद्धस्फटिकसंकाशाय कपर्दिने टङ्कमृगवराभयहस्ताय नागादिभूषोज्ज्वलाय पार्वतीशक्तिस-हिताय महेश्वराय त्रिसहस्रमजपाजपं निवेदयामि ।

विशुद्धचक्रे = कण्ठदेशे —

सर्वाङ्गेषु निविष्टमङ्गरहितं शान्तं त्रिधामास्प
व्याप्ताशेषशरीरकं गुणमयं वास्तव्यसच्चिन्मयम् ॥
मूर्तामूर्तमनन्तरूपममलज्योतिःप्रदीपात्मकं
साक्षात् षोडशवर्णलिप्तकमले जीवं परं चिन्तयेत् ॥

ॐ योऽहमस्मि ब्रह्माहमस्मि, अहमस्मि ब्रह्माहमस्मि, अहमेवाहं मां जुहोमि स्वाहा, ॐसोऽहं जीवात्मने नमः, धूम्रवर्णसदृशाय अं आं इं ईं उं ऊं ऋं ॠं लृं लॄं एं ऐं ओं औं अं अः युतषोडशदलाकाशतत्त्वात्मकविशुद्धकमलकर्णिकास्थिताय प्रदीपकलिकाकाराय ज्योतिःस्वरूपाय अविद्याशक्तिसहिताय जीवात्मने अर्धसहस्रमजपाजपं निवेदयामि नमः ॥ अनाद्यन्तास्त्रण्डाद्वय-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आज्ञाचक्रे-भ्रूमध्ये—

हस्ताभ्यां परिलिप्तगन्धकमले दिव्ये जगत्कारिणं
विश्वातीमनन्तरूपममलं प्रच्छन्नमात्मेच्छया।
मुद्रां ज्ञानमयीं दधानमनघं भक्तानुकम्पापरं
प्रत्यक्षाक्षरविग्रहं गुरुवरं ध्यायेद् द्विनेत्रं विभुम् ॥

ॐ हं ठं खः शुचिषद् वसुरन्तरिक्षसद्धोता वेदिषदतिथि-दुरोणसत्। नृषद् वरसदृतसद् व्योमसदब्जा गोजा ऋतजा अद्रिज ऋतं बृहत्॥ ॐ गुँ गुरवे नमः। शरच्चन्द्रप्रभहं-क्षं-युतद्विदल-मनस्तत्त्वात्मकाज्ञाकमलकर्णिकास्थिताय श्वेतवर्णाय वराभयज्ञाना मुद्रापुस्तकयुक्ताय परापरज्ञानशक्तिसहिताय गुरवे अर्धसहस्रमज-पाजप निवेदयामि नमः।

ब्रह्मरन्ध्रे शिरःप्रदेशे:-

विश्वव्यापिनमादिदेवममलं नित्यं परं निष्कलं
नित्योद्बुद्धसहस्रपत्रकमले लिप्यक्षरैर्मण्डिते ॥
नित्यानन्दमनन्तपूर्णपरचित्सत्तास्फुरत्तात्मकं
स्मृत्वात्मानमनुप्रविश्य कुहरे स्वच्छन्दतः सर्वतः ॥

अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं एं ऐं ओं औं अं अः कं खं गं घं ङं चं छं जं झं ञं टं ठं डं ढं णं तं थं दं धं नं पं फं बं भं मं यं रं लं वं सं षं शं हं क्षं युतरक्तकेशरनानावर्णाधोमुखं विद्युत्कोटिप्रकाशहस्रदलकमलकर्णिका स्थिताय कोटीसूर्यप्रकाशरूपाय चन्द्रकोटीसुशीतलाय

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अनाद्यन्ताखण्डाद्वयस्वयंज्योतिःस्वयंप्रकाशरूपाय निराभासाय निरामयाय सच्चिदानन्दरूपाय विद्याशक्तिसहिताय परमात्मने अर्धसहस्रमजपाजपं निवेदयामि नमः। इति निवेद्य अनेन स्वाभाविकनिश्वासोच्छ्वासात्मकेन अष्टशताधिकदशसहस्रसंख्याकाजपागायत्रीजपेन सकलपापहारिणी राजराजेश्वरी श्रीमहात्रिपुरसुन्दरी प्रीयतामिति प्रणमेत्। ततस्तुरीयपादगायत्रीं जपेत्।

तुरीयपादगायत्री जपः

ॐतुरीयपादगायत्रीमन्त्रस्य विमलऋषिस्तुरीयं छन्दःपरमात्मा देवता मोक्षार्थे जपे विनियोग,ॐ शिरसि विमलर्षये नमः मुखेॐ तुरीच्छन्दसे नमः। हृदि ॐ परमात्मने देवतायै नम। ॐ परो अङ्गुष्ठाभ्यां नमःॐ रजसे तर्जनीभ्यां स्वाहा। ॐ सावदों मध्यमाभ्यां वषट्। ॐपरो अनामिकाभ्यां हुँ। ॐरजसे कनिष्ठिकाभ्यां वौषट्। ॐ सावदों करतलकरपृष्ठाभ्यां फट्। एवमेव हृदयादिन्यासं कृत्वा ध्यानं कुर्यात्।

अग्नीषोमगरुद्द्वयं प्रणवकं विन्दुत्रिनेत्रोज्ज्वलं
भास्वद्रुद्रमुखं शिवाङ्घ्रियुगलं पार्श्वस्थकालानलम्॥
उद्यद्-भास्करकोटिकान्तिसदृशं हंसं जगद्व्यापिनं
नित्यानन्दमयं हृदम्बुजकुटीनीडे सदा भावयेत्॥

मन्त्रः--ॐ परो रजसे सावदोमिति। ॐपरमात्मने नमः इति सहस्रैकं निवेदयेत्। ततःसंकल्पं कुर्यात्। अद्यतनसूर्योदयादारभ्य श्वस्तनसूर्योदयपर्यन्तं स्वाभाविकनिश्वासोच्छ्वासरूपेण अष्टशताधिकदशसहस्रसंख्याकमजपाजपमहं करिष्ये इति अजपाविधिः।

एवमजपाविधिं समाप्य नादानुसन्धानपूर्वकं निरस्तसमस्तोपाधिकेनापि चिद्विलासेन प्रवर्तमानोस्मीति भावयन् सोहं

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हंसः कोहं सच्चिदानन्दोहम् इति सर्वं ब्रह्ममयं भावयेत्-

नाहमस्मि न चान्योस्ति ब्रह्मैवाहं नशोकभाक् ।
सच्चिदानन्दरूपोऽहं नित्यमुक्तस्वभाववान् ॥
नाहमस्मि न चान्योऽस्ति ध्येयं तत्र न विद्यते
आनन्दपदसंलीनं मनसः स्वोरसिस्थितम् ॥ इत्थमात्मानं देवीमयं विभाव्य स्वासनादुत्थाय बहिर्जिगमिषुः प्रथमं पृथिवीं प्रार्थयेत्-

ॐ समुद्रवसने देवि पर्वतस्तनमण्डले
विष्णुपत्नि नमस्तुभ्यं पादस्पर्शं क्षमस्व मे, इति
एव भूमिं प्रार्थ्य श्वासानुसारेण पादन्यासपूर्वकमुत्थाय
ॐ नन्दन्तु साधकाः सर्वे विनश्यन्तु प्रदूषकाः ।
अवस्था शम्भवी मेस्तु प्रसन्नोऽस्तु गुरुः सदा ॥ इति पठन् स्वेष्टदेवानां स्मरन् बहिर्जिगमिषुः यथासंभवम् अग्निं (१) गां श्रोत्रियं द्विजं, दर्पणं वा पश्येत् । ततः (२) शौचार्थं मृज्जलपात्रं गृहीत्वा नैर्ऋत्यदिशि इषुमात्रभूमिं गत्वा अथवा यथासंभवं यथानुकूलं शौचादिकक्षासु गत्वा मृदं जलपात्रं दूरतो निधाय तृणादिना भूमिं पिधाय (३) श्लोकमिमं पठेत्

टिप्पणीः-

(१) श्रोत्रियं सुभगां गां च अग्निमग्निचितं तथा
प्रातरुत्थाय यः पश्येदापद्भ्यः स निमुच्यते । इहि छन्दोगपरिशिष्टे ।

(२) ततः कल्यं समुत्थाय मैत्रं कुर्यान्नरेश्वर । नैर्ऋत्यामिषुविक्षेपमतीत्याभ्याधिकं भुवः इति विष्णुपुराणे ।

(३) शुष्कै स्तृणैस्तथा काष्ठैः पत्रैर्वेणुदलेन वा । मृण्मयैर्भाजनैर्वापिः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ उतिष्ठन्त्वृषयो देवा गन्धर्वा यक्षपन्नगाः ।

परितस्त्यज्यतां भूमिर्विण्मूत्रोत्सर्जनाय मे, ॥ इति पठित्वा वस्त्रेण प्रावृतशिरा दक्षिणकर्णस्थब्रह्मसूत्रो ४ दिवा सन्ध्यासु चोदङ्मुखो रात्रौ दक्षिणामुखो यथानुकूलमुखो वा मलमूत्रत्यागं कुर्यात् । ततो (५) गृहीतशिश्न उत्थाय शुद्धदेशे स्थापितमृज्जलपात्रसमीपे स्थित्वा (६) मृद्भिर्जलैश्च शौचं कुर्यात् । ततः- ह्रीँ ह्रीँ ह्रीँ ह्रीँ ह्रीँ ह्रीँ श्रीँ श्रीँ श्रीँ योगिन्यै नमः इति जलधारया नासारन्ध्रयुगलं संशोधयेत्, ततो विहितदिने द्वादशाङ्गुलसंमितेन विहितकाष्ठेन ।

ॐ अन्नाद्याय व्यूहध्वं सोमोराजाऽयमागमत् ।
स मे मुखं प्रमार्ज्यते यशसा च भगेन च ॥
आयुर्बलं यशो वर्चः प्रजाः पशून् वसूनि च ।
ब्रह्म प्रज्ञां च मेधां च त्वं नो देहि वनस्पते ॥
मुखदुर्गन्धिनाशाय रदनानां विशुद्धये ।
ष्ठीवनाय च गात्राणां कुर्वेऽहं दन्तधावनम् ॥

इत्याद्युक्त्वा ॐ ल्कीँ कामदेवाय सर्वजनप्रियाय नम इति दन्तान् विशोध्य गण्डूषैर्मुखशुद्धिं विधाय हस्तौ पादौ मुखं च प्रक्षाल्य वक्ष्यमाणसूत्रानुसारमाचमनादिकं कुर्यात् । तत्र कातीयानां शौचसूत्रमित्थं पठ्यते:—

अन्तर्धाय वसुन्धरामिति वायुपुराणे । तृणैः कुशादिभिन्नैः काष्ठैः पलाशादिभिन्नैः, तृणमयाशिकं काष्ठनिर्यापस्तम्बोक्तेः ।

(४) मूत्रोच्चारसमुत्सर्गं दिवा कुर्यादुदङ्मुखः ।
दक्षिणाभिमुखो रात्रौ सन्ध्योश्च यथा दिवा इति मनुः ।

(५) गृहीतशिश्नश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः । गन्धलेपक्षयकरं शौचं कुर्यादतन्द्रित इति याज्ञवल्क्यः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथातः शौचविधिं व्याख्यास्यामः। दूरं गत्वा दूरतरं गत्वा, यज्ञोपवीतं शिरसि दक्षिणकर्णे वा धृत्वा, तृणमन्तर्धानं कृत्वोपविश्याहनीत्युत्तरतो निशायां दक्षिणत उभयोः संध्ययोरुदङ्मुखो, नाग्नौ न गोसमीपे, नाप्सु, नागे वृक्षमूले चतुष्पथे गवाङ्गोष्ठे देवब्राह्मणसंनिधौ, दहनभूमिं भस्माच्छन्नं देशं फालकृष्टभूमिं च वर्जयित्वा मूत्रपुरीषे कुर्यात्। ततः शिश्नं गृहीत्वोत्थायाद्भिः शौचं गन्धलेपहरं विदध्यात्। लिङ्गे देया सकृन्मृद् वै, त्रिवारं गुदे, दशधा पाणावुभयोः सप्तवारं मृत्तिकां दद्यात्। करयोः पादयोः सकृत्सकृदेव मृत्तिका देयेति शौचं गृहस्थानां द्विगुणं ब्रह्मचारिणां त्रिगुणं वनस्थानां चतुर्गुणं यतिनामिति। यद्दिवा विहितं शौचं तदर्धं निशायां भवति, मार्गे चेत्तदर्धमार्तश्चेद् यथाशक्ति कुर्यात् ॥१॥ प्रक्षालितपाणिपादः शुचौ देश उपविश्य नित्यं बद्धशिखी यज्ञोपवीती प्रागुदङ् मुखो वा भूत्वा ऽशूद्रानीतोदकैर्द्विजातयो यथाक्रमं हृत्कण्ठतालुगैराचमन्ति। न तद् भिन्नोष्ठेनन विरलाङ्गुलिभिर्न तिष्ठन्नैव हसन् नापि फेनबुद्बुदयुतम्। ब्रह्मतीर्थेन त्रिः पिबेत्, द्विः परिमृजेत्। ब्राह्मणस्य दक्षिणहस्ते पञ्चतीर्थानि भवन्ति, अङ्गुष्ठमूले ब्रह्मतीर्थं कनिष्ठिकाङ्गुलिमूले प्रजापतितीर्थं तर्जन्यङ्गुष्ठमूले पितृतीर्थमङ्गुल्यग्रे देवतीर्थं मध्येऽग्नितीर्थमित्येतानि तीर्थानि भवन्ति ॥२॥ प्रथमं यत् पिबति तेन ऋग्वेदं प्रीणाति, द्वितीयं

(६) एका लिङ्गे गुदे तिस्रस्तथैवे ककरे दश। उभयोःसप्त दातव्या मृदःशुद्धिमभीप्सता, इति मनुः। एककरे वामे, पादयोस्तु मृत्तिकात्रयमित्यन्यत्र। ३२ पेजको बाँकी टीप्पनी

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यत् पिबति तेन यजुर्वेदं प्रीणाति, तृतीयं यत् पिबति तेन सामवेदं प्रीणाति, चतुर्थं यदि पिबेत्तेनाथर्ववेदेतिहासपुराणानि प्रीणाति, यदङ्गुलिभ्यः स्रवति तेन नागयक्षकुबेराः सर्वे देवाः प्रीणन्ति, यत् पादाभ्युक्षणं पितरस्तेन प्रीणन्ति, यन्मुखमुपस्पृशत्यग्निस्तेन प्रीणाति, यन्नासिके उपस्पृशति वायुस्तेन प्रीणाति यच्चक्षुरुपस्पृशति सूर्यस्तेन प्रीणन्ति, यच्छ्रोत्रमुपस्पृशति दिशस्तेन प्रीणन्ति, यन्नाभिमुपस्पृशति ब्रह्मा तेन प्रीणाति, यद् हृदयमुपस्पृशति तेन परमात्मा प्रीणाति यच्छिर उपस्पृशति रुद्रस्तेन प्रीणाति, यद् बाहू उपस्पृशति विष्णुस्तेन प्रीणाति ॥३॥ मध्यमानामिकया मुखं, तर्जन्यङ्गुष्ठेन नासिकां, मध्यमाङ्गुष्ठेन चक्षुषी, अनामिकाङ्गुष्ठेन नाभिं हस्तेन हृदयं, सर्वाङ्गुलिभिः शिर इत्यसौ सर्वदेवमयो ब्राह्मणो देहिनामित्याह इत्येवं शौचविधिं कृत्वा ब्रह्मलोके महीयते ब्रह्मलोके महीयते, इत्याह-भगवान् कात्यायनः ॥४॥

कृत्वालं पादशौचं ह्यमलमथ जलं त्रिः पिबेत् द्विर्विमृज्य
तर्जन्याङ्गुष्ठवत्या सजलमभिमृशेन्नासिकारन्ध्रयुग्मम् ।
अङ्गुष्ठानामिकाभ्यां नयनयुगयुतं कर्णयुग्मं कनिष्ठा-
ङ्गुष्ठाभ्यां नाभिदेशे हृदयमथ तलेनाङ्गुलिभिः शिरांसि ॥इति॥

एवं शौचविधिं समाप्य कुशादिकमादाय देवतागुरुनामादि स्मरन् तीर्थादौ स्नातुं गच्छेत्, तत्र प्रथमं मानसस्नानं कुर्यात तत्र कोटिसूर्यसमकान्तिं निजायुधभूषणैर्युतां स्वशिरःस्थितां देवतां स्मृत्वा तच्चरणोदकधारया ब्रह्मरन्ध्रेणान्तर्विशन्त्यान्तर्गतं

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रापं प्रक्षालयेत् । एवमान्तरस्नानं कृत्वा वैदिकस्नानं कुर्यात् । तत्र कातीयानां स्नानसूत्रमित्थं पठ्यते:—

अथातो नित्यस्नानं,नद्यादौ मृद्गोमयकुशतिलसुमनस आहृत्योदकान्तं गत्वा शुचौ देशे स्थाप्य प्रक्षाल्य पाणिपादं कुशोपग्रहो बद्धशिखी यज्ञोपवीत्वाचम्योरुर्ठं हीति तोयमामन्त्र्यावर्तयेद् ये ते शतमिति, सुमित्रिया न इत्यपोञ्जलिनादाय दुर्मित्रिया इति द्वेष्यं प्रति निषिञ्चेत्; कटिं वस्त्यूरू जङ्घे चरणौ करौ मृदा त्रिस्त्रिः प्रक्षाल्याचम्य नमस्योदकमालभेदङ्गानि मृदेदं विष्णुरिति, सूर्याभिमुखो निमज्जोदापो अस्मानिति,स्वात्वोदिदाभ्य इत्युन्मज्य निमज्योन्मज्याचम्य गोमयेन विलिम्पेन्मानस्तोक इति,ततोऽभिषिञ्चेदिमं मे वरुणेति चतसृभिर्माप, उदुत्तमं, मुञ्चन्त्ववभृथेत्यन्ते चैतन्निमज्योन्मज्याचम्य दर्भैः पावयेदापो हिष्ठेति तिसृभिरिदमापो हविष्मतीर्देवीराप इति, द्वाभ्यामपो देवा द्रुपदादिव, शन्नो देवीरपार्ठ रसमपो देवीः पुनन्तु मेति नवभिश्चित्पतिर्मेत्योङ्कारेण व्याहृतिभिर्गायत्र्या चादावते चान्तर्जलेऽघमर्षणं त्रिरावर्तयेद् द्रुपदादिवायङ्गौरिति वा तृचं प्राणायामं वा सशिरसमोभिति वा विष्णोर्वा स्मरणम् ॥१॥

स्नानस्य आवश्यकतां दर्शयति याज्ञवल्क्यः –

अस्नात्वा नाचरेत्कर्म जपहोमादिकं तथा ।
लालास्वेदसमाकीर्णः शयनादुत्थितः पुमान् ॥
स्विद्यन्ते हि सुषुप्तस्य इन्द्रियाणि स्रवन्ति च ।
अङ्गानि समतां यान्ति चोत्तमान्यधमैः सह इति॥

योगियाज्ञवल्क्यश्च—

स्नानमूलाः क्रियाः सर्वाः श्रुतिस्मृत्युदिता नृणाम् ।
तस्मात् स्नानं निषेवेत श्रीपुष्ट्यारोग्यवर्धनम् इति॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नित्यस्नानाय समानीता मृद्गोमयभस्मकुशतिलयवसुमनसः प्रक्षालिते शुचौ देशे स्थापयित्वा उदकान्तं गत्वा हस्तौ पादौ प्रक्षाल्य शिलासने दारुजासने वा स्थित्वा शिखां बद्ध्वा आचम्य कुशादीन्यादाय संकल्पं कुर्यात्—[गृहे स्नानसंकल्पः-

हरिः ॐ तत्सत् ३ ॐ विष्णुः ३ श्रीमदन्तकोटिब्रह्माण्डाधीश्वर्याः सच्चिदानन्दमय्या महाशक्तिस्वरूपिण्याः श्रीजगदम्बिकाया इङ्गितमनुसरतः श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य सकलजगत्सृष्टिकारिणो ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे तत्प्रथमचरणे भारतवर्षे भरतखण्डे आर्यावर्तान्तरगते हिमालयपर्वतैकदेशे श्रीमद्विष्णुप्रजातिक्षेत्रान्तर्गते पाशुपतक्षेत्रे वाग्वतीविष्णुगङ्गयोरन्तराले .. .. टोल्लके स्वगृहे षष्टिसंवत्सराणां मध्ये ... ... नाम संवत्सरे श्रीसूर्ये .. ..यने ऋतौ ... मासे ... ... पक्षे .. ... वासरान्वितायां .. .. शुभपुण्यतिथौ अद्येह समस्तपापक्षयपूर्वकं श्रीमदिष्टदेवता प्रसादफलकशास्त्रार्थानुष्ठानसिद्ध्यर्थं प्रातः स्नान [तन्त्रेण प्रातर्मध्यान्हस्नानम्] मह करिष्ये इति संकल्प्य तीर्थप्रार्थनां कुर्यात्-

आपो नारायणोद्भूतास्ता एवास्यायनं पुनः ।
तस्मान्नारायणं देवं स्नानकाले स्मराम्यहम् ॥
त्वं राजा सर्वतीर्थानां त्वमेव जगतः पिता ।
याचितं देहि मे तीर्थ, सर्वपापैः प्रमुच्यते ॥
नमामि गङ्गे तव पादपङ्कजं
सुरासुरैर्वन्दितदिव्यरूपम् ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भुक्तिं च मुक्तिं च ददासि नित्यं
भावानुसारेण सदा नराणाम् ॥
पुष्कराद्यानि तीर्थानि गङ्गाद्याः सरितस्तथा ।
आगच्छन्तु पवित्राणि स्नानकाले सदा मम ॥
गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धो कावेरि जलेऽस्मिन् संनिधिं कुरु ॥
नन्दिनी नलिनी सीता मालती च मलापहा ।
विष्णुपादाब्जसम्भूता गङ्गा त्रिपथगामिनी ॥
भागीरथी भोगवती जान्हवी त्रिदशेश्वरी ।
द्वादशैतानि नामानि यत्र यत्र जलाशये ॥
स्नानोद्यतः पठेत्तत्र तत्रैव निवसाम्यहम् ।
एतान् मन्त्रान् पठित्वान्ते सर्वाङ्गस्नानमाचरेत् ॥
इति गृहे स्नानम्] ।

नद्यादौ तु—

॥ नमामि गङ्गे तवपादपङ्कज
सुरासुरैर्वन्दितदिव्यरूपम् ।
भुक्तिं च मुक्तिं च ददासि नित्यं
भावानुसारेण सदा नराणाम् ॥
या गतिर्योगमुक्तानां मुनीनामूर्ध्वरेतसाम् ।
सा गतिः सर्वजन्तूनां गौतमीतीरवासिनाम् ॥
पुष्कराद्यानि तीर्थानि गङ्गाद्याः सरितस्तथा ।
आगच्छन्तु पवित्राणि स्नानकाले सदा मम ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्वं राजा सर्वतीर्थानां त्वमेव जगतः पिता ।
याचितं देहि मे तीर्थ सर्वपापैः प्रमुच्यते ॥
अपामधिपतिस्त्वं च तीर्थेषु वसतिस्तव ।
वरुणाय नमस्तुभ्यं स्नानानुज्ञां प्रयच्छमे ॥
अधिष्ठात्र्यश्च तीर्थानां तीर्थेषु निवसन्ति याः ।
देवतास्ताः प्रयच्छन्तु स्नानाज्ञां मम सर्वदा ॥
गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् संनिधिं कुरु ॥
कर्णाली भेरिका शुक्ला गण्डकी कौशिकी तथा ।
वाग्वत्यैरावती चैताः सप्तनद्यः पुनन्तु नः ॥

इति संप्रार्थ्य हस्तौ पादौ प्रक्षाल्य पूर्ववत् संकल्पवाक्यं पठित्वा तीर्थाभिमन्त्रणं कुर्यात्—

ॐ उरु र्ठं हि राजा वरुणश्चकार सूर्याय पन्थामन्वेतवाउ ।
अपदे पादा प्रतिधातवेकरुतापवक्ता हृदयाविधश्चित् ॥
नमो वरुणायाभिष्ठितो वरुणस्य पाशः इति तीर्थतोयमामन्त्र्य जपेत् : तत ॐ ये ते शतं वरुण ये सहस्रं यज्ञिया पाशा वितता महान्तः ॥ तेर्भिन्नो अद्य सवितो त विष्णुर्विश्वे मुञ्चतु मरुतः स्वर्काः ॥ इति अधोमुखेन पाणिना तोयमावर्तयेत् । ततः ॐ सुमित्रिया न आप ओषधयः सन्तु इति तीर्थतोयमञ्जलिनादाय, ॐ दुर्मित्रियास्तस्मै सन्तु यो ऽस्मान् द्वेष्टि यं च वयं द्विष्म इति तीर्थतटे स्ववामभागे प्रक्षिपेत् ॥ ततः ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पाठं सुरेस्वाहा ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे ।
उद्धृतासि वराहेण कृष्णेन शतबाहुना ॥
मृत्तिके ब्रह्मपूतासि काश्यपेनाभिवन्दिता ।
त्वया हतेन पापेन गच्छामि परमां गतिम् ॥
मृत्तिके हर मे पापं यन्मया दुष्कृतं कृतम् ।

इति दक्षहस्तेन शिरःप्रभृतिनाभिपर्यन्तं वामहस्तेन नाभिप्रभृतिपादपर्यन्तं मृत्तिकां लिम्पेत् । ततः पाणी प्रक्षाल्य नाभिदघ्नजलं प्रविश्य ॐ आपो अस्मान् मातरः शुन्धयन्तुघृतने घृतप्वः पुनन्तु । विश्वꣳ हि रिप्रं वहन्ति देवीः । इति निमज्ज्य उदिदाभ्यः शुचिरापूत एमि, इत्युन्मज्जेत् । ततः—
ॐ अग्रमग्रं चरन्तीनामोषधीनां वने वने ॥

तासां वृषभपत्नीनां पवित्रं कायशोधनम् ।
तन्मे रोगाँश्च शोकाँश्च पापं मे हर गोमय ॥

इति गोमयमभिमन्त्र्य ॐ मानस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः । मानो वीरान् रुद्र भामिनो वधीर्हविष्मन्तः सदमित्वा हवामहे ॥ इति मृत्तिकावत् सर्वाङ्गेषु लिम्पेत् । पूर्ववत् प्रक्षाल्य निमज्ज्योन्मज्ज्याचमेत् । [ततः ॐ जलमिति भस्म स्थलमिति भस्म व्योमेति भस्म सर्वꣳ ह वा इदं भस्म मन एतानि चक्षूꣳषि भस्मानीति । ॐ प्रसद्य भस्मना योनिमपश्च पृथिवीमग्ने । सꣳसृज्य मामभिष्ट्वं ज्योतिष्मान् पुनरासदः । इति मृत्तिकावत् सर्वाङ्गेषु भस्मलेपनं कुर्यात् । पूर्ववत् प्रक्षाल्य निमज्ज्योन्मज्ज्याचमेत् । इति क्षेपकम्] ततो-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वक्ष्यमाणमन्त्रैः स्वजलेन कुशत्रयेण नाभिदक्षिणपार्श्वमारभ्य शीर्षोपरि नीत्वा नाभिवामपार्श्वपर्यन्तं प्रदक्षिणमात्मानं पावयेत्। ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युराचके॥ ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानोहविर्भिः। अहेडमानो वरुणे ह बोध्युरु शंसमान आयुः प्रमोषीः॥ त्वं नो अग्ने वरुणस्य विद्वान् देवस्य हेडो अवयासिसीष्ठाः। यजिष्ठो वन्हितमः शोशुचानो विश्वा द्वेषांसि प्रमुमुग्ध्यस्मत्॥ सत्त्वन्नोअग्ने वमो भवोती नेदिष्ठो अस्या उषसोव्युष्टौ। अवयश्च नो वरुणंरराणो वीहि मृडीकं सुहवो न एधि॥ मापो मौषधीर्हिंसीर्धामो धाम्नो राजंस्ततो वरुण नो मुञ्च। यदाहुरन्ध्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च॥ उदुत्तमं वरुणपाशमस्मदवाधमं विमध्यमं श्रथाय। अथावयमादित्यव्रते तवानागसो अदितये स्याम॥ मुञ्चन्तु मा शपथ्यादथो वरुण्यादुतः। अथो यमस्य पड्वीशात् सर्वस्मादेव किल्विषात्॥अवमृथ निचम्पुण निचेरुरसि निचुम्पुणः। अव देवैर्देवकृतमेनो ऽ यासिषमवमर्त्यैर्मर्त्यकृतं पुरुराव्णो देव रिषस्पाहि॥ ॐ पुनातु, ॐ भूः पुनातु ॐ भुवः पुनातु; ॐ स्वः पुनातु ॐ महः पुनातु ॐ जनः पुनातु ॐ तपः पुनातु ॐ सत्यं पुनातु, ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियोयोनः प्रचोदयात् सर्वं पुनातु। इति मार्जयित्वा पुनः पूर्ववत् तूष्णीं स्नात्वाऽऽचम्य पुनर्दर्भैर्मार्जयेत्—

ॐ आपो हि ष्ठा मयो भुवस्ता न ऊर्जे दधातन। महेरणाय चक्षसे॥ ॐ यो वः शिवतमो रसस्तस्य भाजयतेह नः।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उशतीरिव मातरः ॥ ॐ तस्मा अरं गमाम वो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः ॥ ॐ इदमापः प्रवहतावद्यं च मलं च यत् । यच्चाभिदुद्रोहानृतं यच्च शेपे अभीरुणम् ॥ आपोमातस्मादेनसः पवमानश्च मुञ्चतु ॥ ॐ हविष्मतीरिमा आपो हविस्माँ आविवासति । हविस्मान् देवो अध्वरो हविस्माँ अस्तु सूर्यः ॥ ॐ देवीरापो अपां नपाद् यो व उर्मिर्हविष्य इन्द्रियावान् मदिन्तमः ॥ तं देवेभ्यो देवत्रा दत्त शुक्रपेभ्यो येषां भागस्थ स्वाहा ॥ ॐ कार्षिरसि समुद्रस्य त्वा क्षित्या उन्नयामि । समापो अद्भिरग्मत समोषधीभिरोषधीः ॥ ॐ अपो देवा मधुमतीरगृभ्णन्नूर्जस्वतीराजस्वश्चितानाः । याभिर्मित्रावरुणावभ्यषिञ्चन्याभिरिन्द्रमनयन्नत्यरातीः । ॐ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव । पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ॥ ॐ शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शंयो रभिस्रवन्तु नः ॥ ॐ अपा ँ रसमुद्वयसँ सूर्ये सन्तँ समाहितम् । अपाँ रसस्य यो रसस्तं वो गृह्णाम्युत्तममुपयामगृहीतोसीन्द्राय त्वा जुष्टं गृह्णाम्येष ते योनिरिन्द्राय त्वा जुष्टतमम् ॥ ॐ अपो देवीरुपसृज मधुमतीरयक्ष्माय प्रजाभ्यः । तासामास्थानादुज्जिहतामोषधयः सुपिप्पलाः । ॐ पुनन्तु मा पितरः सोम्या सः पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः । पवित्रेण शतायुषा ॥ ॐ पुनन्तु मा पितामहाः पुनन्तु प्रपितामहाः । पवित्रेण शतायुषा विश्वमायुर्व्यश्नवै ॥ ॐ अग्न आयूँषि पवस आसुवोर्जमिषं च नः । आरे बाधस्व दुच्छुनाम् ॥ ॐ पुनन्तु मा देवजनाः पुनन्तु

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मनसा धियः । पुनन्तु विश्वा भूतानि जातवेदः पुनीहि मा ॥ ॐ पवित्रेण पुनीहि मा शुक्रेण देव दीद्यत् । अग्ने क्रत्वा क्रतूँ २ रनु ॥ ॐ यत्ते पवित्रमर्चिष्यग्ने विततमन्तरा । ब्रह्म तेन पुनातु मा ॥ ॐ पवमानः सो अद्य नः पवित्रेण विचर्षणिः । यः पोता स पुनातु मा ॥ ॐ उभाभ्यां देव सवितः पवित्रेण सवेन च । मां पुनीहि विश्वतः ॥ ॐ वैश्वदेवी पुनती देव्यागाद् यस्यामिमा बव्ह्यस्तन्वो वीतपृष्ठाः । तया मदन्तः सधमादेषु वयं ठँ स्याम पतयो रयीणाम् ॥ इति मार्जयित्वा उदकं स्पृशेत् । ततः- ॐ चित्पतिर्मा पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् ॥ इतिनाभे-रूर्ध्वं मार्जयेत् । ॐ वाक्पतिर्मा पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम ॥ इति नाभेरधो मार्जयेत् । ॐ देवो मा सविता पुनात्वच्छिद्रेण पवित्रेण सूर्यस्य रश्मिभिः । तस्य ते पवित्रपते पवित्रपूतस्य यत्कामः पुने तच्छकेयम् । इति सर्वाङ्गे मार्जयेत् ॥ ततः ॐ पुनातुः ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय । त्वा-मवस्युराचके ॥ ॐ भूः पुनातु, ॐ तत्त्वा यामि ब्रह्मणा वन्दमानस्तदाशास्ते यजमानो हविर्भिः । अहेडमानो वरुणे हवोध्युरुश ठँ समान आयुः प्रमोषीः ॥ ॐ भुवः पुनातु, ॐ त्वन्नो अग्ने वरुणस्य विद्वान देवस्य हेडो अवयासिसीष्ठाः । यजिष्ठो वन्हितमः शोशुचानो विश्वा द्वेषाठँसि प्रमुमुग्ध्यस्मत् ॥ ॐ स्वःपुनातु, ॐ स त्वं नो अग्ने वमो भवोती नेदिष्ठो अस्या उषसो व्युष्टौ । अवयक्ष्वनो वरुण ठँ रराणो वीहि मृडीक ठँ सुहवो

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न एधि ॥ॐमहः पुनातु,ॐ मापो मौषधीर्हिं ठं सीर्धाम्नो धाम्नो राजँस्ततो वरुण नो मुञ्च । यदाहुरघ्न्या इति वरुणेति शपामहे ततो वरुण नो मुञ्च ॥ ॐ जनः पुनातुः । उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यम ठं श्रथाय । अथा वयमादित्य व्रते तवानागसो अदितये स्याम ॥ ॐ तपः पुनातु, ॐ मुञ्चन्तु मा शपथ्यादथो वरुण्यादुत । अथो यमस्य पड्वीशात्सर्वस्मादेव किल्विषात् ॥ ॐ सत्यं पुनातु, ॐ अवभृथ निचम्पुण निचेरुरसि निचुम्पुणः । अवदेवैर्देवकृतमेनोऽयासिषमवमर्त्यैर्मर्त्यकृतं पुरुराव्णो देव ऋपस्पाहि ॥ ॐ पुनातु । इति मन्त्रैर्दर्भैर्मार्जयित्वोदकं स्पृशेत् ॥ ततो ऽ पामार्गेण दूर्वाभिश्च पृथक् पृथक् मार्जयेत् (इदं मार्जनद्वय श्रावणीनिमित्तके महायज्ञारम्भादिनिमित्तके स्नाने च कार्यं नतु नित्यस्नाने) अपामार्गपत्राण्यादाय ॐ अपाधमपकिल्विषमपकृत्यामपोरपः । अपामार्ग त्वमस्मदप दुःष्वप्न्य ठं-सुव ॐ । पुनातु इति मार्जयित्वा अपामार्गं परित्यज्य दूर्वाङ्कुरानादाय ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि । एवानो दूर्वे प्रतनु सहस्रेण शतेन च, ॐ पुनातु इति मार्जयेत्, ततो दूर्वाङ्कुरान् परित्यज्य अघमर्षणं कुर्यात् । तद् यथा ॐ अघमर्षण सूक्तस्य अघमर्षण ऋषिरनुष्टुप्छन्दो भाववृत्तो देवता अघमर्षणे विनियोग इत्युच्चार्य अन्तर्जले ॐ ऋतं च सत्यं चाभीद्धात्तपसो ऽ ध्यजायत । ततो रात्र्यजायत ततः समुद्रो अर्णवः । समुद्रादर्णवादधि संवत्सरो अजायत । अहोरात्राणि विदधद्विश्वस्य मिषतो वशी । सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवं च पृथिवीं चान्तरिक्षमथो स्वः । इति शनैः मनसा वारत्रयं

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

जपित्वोन्मज्य आचमेत्, एवं वैदिकस्नानं विधाय तान्त्रिकस्नानं विदध्यात्।

अल्पत्वाद् होमकालस्य महत्त्वात् स्नानकर्मणः
प्रातर्न तनुयात् स्नानं होमलोपो विगर्हितः।

इति वचनात् साग्निः पादप्रक्षालनादि गोमयविलेपनान्तं कृत्वा मुञ्चन्तु मेत्यभिषिच्य निमज्ज्योन्मज्ज्याचम्य दर्भैः प्रणव-व्याहृति-गायत्रीभिः प्रतिमन्त्रं पावयित्वा मुञ्चन्तु मेति पुनरभिषिच्यान्तर्जले ऽघमर्षणादीनामन्यतममावर्त्याचम्य निर्गच्छेत्। निरग्निस्तु कृत्स्नमनुतिष्ठेत् संकोचनिमित्तस्य होमस्याभावात्। जटिनः शिरोरोगिणश्चाकण्ठमज्जनं स्नानम्। सभर्तृकर्योषितां च। ग्रहणादिनिमित्तं गङ्गादितीर्थे संक्रान्त्यादि-पर्वनिमित्तं च जट्यादीनामपि सशिरस्कमेव। स्त्रीशूद्राणां सर्वत्र तूष्णीम्।

एवं वैदिककर्माधिकारसिध्यर्थं वैदिकस्नानं विधाय तान्त्रिक-कर्मार्हताप्राप्तये तान्त्रिकस्नानं कुर्यात्, तद् यथा—

[1]तान्त्रिकस्नानप्रयोगः

मूलेन प्राणानायम्य ऋष्यादिषडङ्गन्यासं कृत्वा आदित्य-मण्डलात्तीर्थान्यङ्कुश [2]मुद्रया

ॐ ब्रह्माण्डोदरतीर्थानि करैः स्पृष्टानि ते रवेः।
तेन सत्येन देवेश तीर्थं देहि दिवाकर ॥

(१) इदमेव मन्त्रस्नानमिति व्यपदिश्यते।

(२) ऋज्वीं मध्यमिकां कृत्वा तर्जनीं मध्यपर्वणि। संयोज्याकुञ्चयेत्किञ्चिन्मुद्रैषाङ्कुशसंज्ञिता इति ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ गङ्गे च यमुने चैव गोदावरि सरस्वति।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् संनिधिं कुरु ॥
ॐ आवाहयामि देवि त्वां तीर्थशक्तिस्वरूपिणीम्।
सूर्यमण्डलतो ब्रह्मरन्ध्रमध्ये समाश्रिताम् ॥
सर्वानन्दमयीमशेषदुरितध्वंसां मृगाङ्कप्रभां
त्र्यक्षां चोर्ध्वकरद्वयेन दधतीं पाशं सृणिं च क्रमात्।
दोर्भ्यां चामृतपूर्णहेमकलशं मुक्ताक्षमालाधरां
गङ्गां सिन्धुसरिद्वरादिसहितां श्रीतीर्थशक्तिं भजे ॥

ॐ ह्राँ ह्रीँ ह्रूँ ह्रैँ ह्रौँ ह्रः सर्वानन्दमयि तीर्थशक्ते एह्येहि स्वाहा इत्यावाह्य तज्जलं गाङ्गमन्त्रेण मन्त्रयेदष्टवारकम्—ॐ नमो भगवति अम्बे अम्बिके अम्बालिके महामालिनि एह्येहि भगवति अशेषतीर्थालवाले ह्रीँ श्रीँ शिवजटाधिरूढे गङ्गे गङ्गाम्बिके स्वाहा इत्यभिमन्त्र्य वंबीजेन तज्जले तीर्थानि योजयेत्। ततोऽग्नि-सूर्यचन्द्रमण्डलानि तत्र विचिन्त्य ह्रीँ इत्यालोड्य वंबीजे-नाऽमृतीकृत्य हुँबीजेनावगुण्ठ्य फडिति मन्त्रेण संवेष्ट्य मूलेनैकादशवारमभिमन्त्र्येष्टदेवतां मनसि स्मरञ्जलं वक्ष्यमाण-मन्त्रेण प्रणमेत्।

ॐ आधारः सर्वभूतानां विष्णोरतुलतेजसः।
तद्रूपाश्चततो जाता आपस्ताः प्रणमाम्यहम् ॥ इति प्रणम्य। श्रीलक्ष्म्यैनमः श्रीँ ह्रीँ श्रीँ कमले कमलालये प्रसीद प्रसीद ह्रीँ श्रीँ ह्रीँ ॐ महालक्ष्म्यै नमः श्री सहकलह्रीँ श्रीसाम्राज्यलक्ष्म्यै नमः मूलं श्रीमहात्रिपुरसुन्दर्यै नमः इति मुखं प्रक्षाल्य निमज्जयेत्।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्र मूलं देवस्वरूपं च स्मरन्नुन्मज्य [३]कुम्भमुद्रया सप्तवारं शिरस्यभिषिञ्चेत् । ततो मूलमन्त्रेण वक्ष्यमाणैश्चतुर्भिर्मन्त्रैश्च तनुमभिषिञ्चेत्–

ॐ वं सिसृक्षोरखिलं विश्वं मुहुः शुक्रं प्रजायते ।
मातरः सर्वभूतानामापो देव्यः पुनन्तु माम् ॥
अलक्ष्मीर्मलरूपा याः सर्वभूतेषु संस्थिताः ।
क्षालयन्ती निजस्पर्शादापो देव्यः पुनन्तु माम् ॥
यन्मे केशेषु दौर्भाग्यं सीमन्ते यच्च मूर्धनि ।
ललाटे कर्णयोरक्ष्णोरापस्तद् घ्नन्तु वो नमः ॥
आयुरारोग्यमैश्वर्यमरिपक्षक्षयः सुखम् ।
सन्तोषः क्षान्तिरास्तिक्यं विद्या भवन्तु वो नमः

एवं स्नानतन्त्रं समाप्य स्नानाङ्गतर्पणं कुर्यात्–ॐ ब्रह्मादयो देवास्तृप्यन्ताम् । ॐ भूर्देवास्तृप्यन्ताम् । ॐ भुवर्देवास्तृप्यन्ताम् । ॐ स्वर्देवास्तृप्यन्ताम् । ॐ भूर्भुवः स्वर्देवास्तृप्यन्ताम् । ॐ सनकादिद्वैपायनादय ऋषयस्तृप्यन्ताम् । ॐ भूर्ऋषयस्तृप्यन्ताम् ॐ भुवर्ऋषयस्तृप्यन्ताम् । ॐ स्वर्ऋषयस्तृप्यन्ताम् । ॐ भूर्भुवः स्वर्ऋषयस्तृप्यन्ताम् । ॐ कव्यवाडनलादयो दिव्यपितरस्तृप्यन्ताम् । ॐ भूः पितरस्तृप्यन्ताम् । ॐ भुवः पितर-

---

(३) हस्तद्वयेन सावकाशैकमुष्टिकरणं कुम्भमुद्रा । दक्षाङ्गुष्ठ पराङ्गुष्ठे क्षिप्त्वा हस्तद्वयेन तु । सावकाशात्मिकां मुष्टिं कुर्यात्सा कुम्भमुद्रिका । मुष्टयोरूर्ध्वकृताङ्गुष्ठौ तर्जन्यग्रे तु विन्यसेत् । सर्वरक्षाकरी ह्येषा कुम्भमुद्रा समीरिता इति च ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्तृप्यन्ताम् । ॐ स्वः पितरस्तृप्यन्ताम् । ॐ भूःर्भुव स्वः पितरस्तृप्यन्ताम् । ततोऽञ्जलिना जलमादाय—

ॐ यन्मया दूषितं तोयं शारीरमलसम्भवात् । तस्य पापस्य शुध्यर्थं यक्ष्मैतत्ते तिलोदकमिति तीर्थतटे जलं प्रक्षिपेत् ॥ ततः—

ॐ लतागुल्मेषु वृक्षेषु पितरो ये व्यवस्थिताः ।
ते सर्वे तृप्तिमायान्तु मयोत्सृष्टैस्तिलोदकैः ॥ इति

शिखाग्रं निष्पीडयेत् [ॐ विश्वामित्रस्तृप्यताम् । ॐ जमदग्निस्तृप्यताम् । ॐ भारद्वाजस्तृप्यताम् ॐ गौतमस्तृप्यताम् । ॐ अत्रिस्तृप्यताम् । ॐवसिष्ठस्तृप्यताम । ॐ कश्यपस्तृप्यताम् । ॐ दक्षस्तृप्यताम् । ॐ मरीचिस्तृप्यताम् । ॐ अङ्गिरास्तृप्यताम् । ॐ पुलस्त्यस्तृप्यताम । ॐ पुलहस्तृप्यताम् । ॐ क्रतुस्तृप्यताम । ॐ प्रचेतास्तृप्यताम् । ॐ भृगुस्तृप्यताम् । ॐ मनवस्तृप्यन्ताम् ॥] ततो जलादुतीर्य धौते वाससी परिधाय जङ्घे ऊरू करौ च मृदा जलेन च प्रक्षाल्य आचम्य विप्रपादोदकं शालग्रामशिलाजलं च पीत्वा दक्षिणावर्तशङ्खोदकेन मस्तके त्रिः परिभ्राम्य प्रक्षिपेत् । एवम् आन्तरस्नानं वैदिकस्नानं मन्त्रस्नानं च विधाय भस्मनां तिर्यक्पुण्ड्रकरणं कुर्यात् ।

त्रिपुण्ड्रधारणविधिः—

अस्य श्रीविभूतिधारणमन्त्रस्य सदाशिव ऋषिस्त्रिष्टुप्छन्दः रुद्रो देवता हं वीजं हूँ शक्तिः क्षं की लकं सर्वपापक्षयार्थे विभूतिधारणे विनियोगः । ॐ सदाशिव ऋषये नमः शिरसि । त्रिष्टुप्छन्दसे नमो मुखे । रुद्रदेवतायै नमो हृदये । हं बीजाय

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमो गुह्ये । हूँ शक्तये नमः पादयोः । क्षँकीलकाय नमो नाभौ । ॐ विनियोगाय नमः सर्वाङ्गे इति विन्यस्य हस्ते जलं गृहीत्वा ॐ नमः शिवाय १०, मूलं ३, ॐ हँ हूँ क्षँ फट् विभूते अशेष-दुरितापहे मनोवाक्कायं शोधय शोधय हूँ फट् स्वाहा । ॐ त्र्यम्बकं, ॐत्र्यायुषं,प्रसद्य, ॐअग्निरिति भस्म० इति । संमन्त्र्य ॐब्रह्मणे नमः ललाटे ॐ हव्यवाहनाय नमः वक्षसि, ॐ स्कन्दाय नमो नाभौॐपूष्णे नमः कण्ठे,मूलं रुद्राय नमः दक्षनाड्यम् आदित्याय नमः दक्षकूर्परे, चन्द्राय नमः दक्षिणहस्ते, मूलं- वामदेवाय नमः वामनाड्यां, प्रभञ्जनाय नमः वामकूर्परे, वसुभ्यो नमः वामबाहौ । हरये नमः पृष्ठे, शम्भवे नमः ककुदि, ॐ परमात्मने नमः ब्रह्मरन्ध्रे इति विभूतिधारणं कृत्वा करतलावशिष्टं भस्म प्रक्षाल्य शुचौ देशे त्यजेत्-ऐँ ह्रीँ क्लीँ सौँ:त्रैलोक्यमोहनं कुरु कुरुस्वाहा । इति तिलकधारणं कृत्वा स्वशरीरं पूतं भावयित्वा ततश्च संध्योपयोगिसामग्रीं संभृत्य संन्ध्योपासनां कुर्यात्—

स्नानानन्तरं संध्योपासनां कृवैत्व अन्यकर्मसु अर्हता भवति इति प्रदर्शयति दक्षः- सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु । यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत् इति । कातीयानां स्नानविध्यन्तर्गतं सन्ध्यासूत्रमित्थं पठ्यते—

"उत्तीर्य धौते वाससी परिधाय मृदोरू करौ प्रक्षाल्याचम्य त्रिरायम्यासून् पुष्पाण्यम्बुमिश्राण्यूर्ध्वं क्षिप्त्वोर्ध्वबाहुः सूर्यमुदीक्षय न्नुद्वयमुदुत्यं चित्रं तच्चक्षुरिति गायत्र्या च यथाशक्ति विभ्राडित्य-नुवाकपुरुषसूक्तशिवसंकल्पमण्डलब्रह्मणैरित्युपस्थाय प्रदक्षिणी-कृत्यं नमस्कृत्योपविशेद् दर्भेषु दर्भपाणिः स्वाध्यायं च यथाशक्तया

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दावारभ्य वेदम् ॥इति॥ काण्वमाध्यन्दिनप्रभृतिशुक्लयजुर्वेदीय पञ्चदशशाखाऽध्यायिनां कृते कात्यायनाचार्येण पूर्वोक्तसूत्र-संदर्भानुसारं प्रतिपादितं संध्योपासनं स्वगृह्योक्तत्वात् शास्त्रा-नुष्ठानसिद्धिकरं यत्पुनः शाखान्तराधिकरणन्यायेन इदमेव कल्पतरुकारप्रभृतिभिर्निबन्धकारैश्च स्मृत्यन्तरोक्तसंध्योपासनविधि-समुच्चितं लिखितं तत्सर्वशाखाध्येतृसाधारणत्वात् सर्वशाख्यनु-ष्ठानोपयुक्तमिति पूर्वाचार्याः ।

तत्रादौ श्रीपर्णादिप्रशस्तदारुनिर्मिते सुप्रक्षालिते कुशत्रया-च्छन्ने नेपालकम्बलादिपरिवृते आसने प्रागास्य उदगास्यो वा ऽऽसीनः उक्तलक्षणपवित्रोपग्रहः सुवर्णरौप्यालङ्कृतपाणि-युगलः कुण्डलकटककेयूरादिमण्डितदेहः कण्ठधृतस्फाटिकरुद्राक्ष-मुक्ताप्रवालसुवर्णादिमाल्यः सविधिबद्धशिखः उक्तेन विधिना द्विरा-चम्य भगवन्तं परमात्मस्वरूपं नारायणं संस्मृत्य संध्योपासन-मारभेत । तद् यथा ॐ पृथ्वीति मन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता आसने विनियोगः । ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता । त्वं च धारय मां देवि पवित्रं कुरु चासनम् इत्यासनसहितां भूमिं प्रार्थ्य, ॐ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया । अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् । सर्वेषामविरोधेन संध्याकर्म समारभे । इति वामपादपार्ष्णिना त्रिर्भूमिं ताडयेत् । ॐ तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि । इति भैरवस्य अनुज्ञां चादाय पूर्वोक्तमासनमध्यास्य विनियोगमुच्चरेत्— ॐ कारस्य

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नमो गुह्ये । हूँ शक्तये नमः पादयोः । क्षँकीलकाय नमो नाभौ । ॐ विनियोगाय नमः सर्वाङ्गे इति विन्यस्य हस्ते जलं गृहीत्वा ॐ नमः शिवाय १०, मूलं ३, ॐ हँ हूँ क्षँ फट् विभूते अशेष-दुरितापहे मनोवाक्कायं शोधय शोधय हूँ फट् स्वाहा । ॐ त्र्यम्बकं, ॐत्र्यायुषं,प्रसद्य, ॐअग्निरिति भस्म० इति । संमन्त्र्य ॐब्रह्मणे नमः ललाटे ॐ हव्यवाहनाय नमः वक्षसि, ॐ स्कन्दाय नमो नाभौॐपूष्णे नमः कण्ठे,मूलं रुद्राय नमः दक्षनाड्यम् आदित्याय नमः दक्षकूर्परे, चन्द्राय नमः दक्षिणहस्ते, मूलं- वामदेवाय नमः वामनाड्यां, प्रभञ्जनाय नमः वामकूर्परे, वसुभ्यो नमः वामबाहौ । हरये नमः पृष्ठे, शम्भवे नमः ककुदि, ॐ परमात्मने नमः ब्रह्मरन्ध्रे इति विभूतिधारणं कृत्वा करतलावशिष्टं भस्म प्रक्षाल्य शुचौ देशे त्यजेत्-ऐँ ह्रीँ क्लीँ सौँ:त्रैलोक्यमोहनं कुरु कुरुस्वाहा । इति तिलकधारणं कृत्वा स्वशरीरं पूतं भावयित्वा ततश्च संध्योपयोगिसामग्रीं संभृत्य सन्ध्योपासनां कुर्यात्—

स्नानानन्तरं संध्योपासनां कृत्वैव अन्यकर्मसु अर्हता भवति इति प्रदर्शयति दक्षः- सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्वकर्मसु । यदन्यत्कुरुते कर्म न तस्य फलभाग्भवेत् इति । कातीयानां स्नानविध्यन्तर्गतं सन्ध्यासूत्रमित्थं पठ्यते—

"उत्तीर्य धौते वाससी परिधाय मृदोरू करौ प्रक्षाल्याचम्य त्रिरायम्यासून् पुष्पाण्यम्बुमिश्राण्यूर्ध्वं क्षिप्त्वोर्ध्वबाहुः सूर्यमुदीक्षय न्नुद्वयमुदुत्यं चित्रं तच्चक्षुरिति गायत्र्या च यथाशक्ति विभ्राडित्य-नुवाकपुरुषसूक्तशिवसंकल्पमण्डलब्रह्मणैरित्युपस्थाय प्रदक्षिणी-कृत्य नमस्कृत्योपविशेद् दर्भेषु दर्भपाणिः स्वाध्यायं च यथाशक्तया

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दावारभ्य वेदम् ॥इति॥ काण्वमाध्यन्दिनप्रभृतिशुक्लयजुर्वेदीय पञ्चदशशाखाऽध्यायिनां कृते कात्यायनाचार्येण पूर्वोक्तसूत्र-संदर्भानुसारं प्रतिपादितं संध्योपासनं स्वगृह्योक्तत्वात् शास्त्रा-नुष्ठानसिद्धिकरं यत्पुनः शाखान्तराधिकरणन्यायेन इदमेव कल्पतरुकारप्रभृतिभिर्निबन्धकारैश्च स्मृत्यन्तरोक्तसंध्योपासनविधि-समुच्चितं लिखितं तत्सर्वशाखाध्येतृसाधारणत्वात् सर्वशाख्यनु-ष्ठानोपयुक्तमिति पूर्वाचार्याः ।

तत्रादौ श्रीपर्णादिप्रशस्तदारुनिर्मिते सुप्रक्षालिते कुशत्रया-च्छन्ने नेपालकम्बलादिपरिवृते आसने प्रागास्य उदगास्यो वा ऽऽसीनः उक्तलक्षणपवित्रोपग्रहः सुवर्णरौप्यालङ्कृतपाणि-युगलः कुण्डलकटककेयूरादिमण्डितदेहः कण्ठधृतस्फाटिकरुद्राक्ष-मुक्ताप्रवालसुवर्णादिमाल्यः सविधिबद्धशिखः उक्तेन विधिना द्विरा-चम्य भगवन्तं परमात्मस्वरूपं नारायणं संस्मृत्य संध्योपासन-मारभेत । तद् यथा ॐ पृथ्वीति मन्त्रस्य मेरुपृष्ठ ऋषिः सुतलं छन्दः कूर्मो देवता आसने विनियोगः । ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता । त्वं च धारय मां देवि पवित्रं कुरु चासनम् इत्यासनसहितां भूमिं प्रार्थ्य, ॐ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया । अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम् । सर्वेषामविरोधेन संध्याकर्म समारभे । इति वामपादपार्ष्णिना त्रिर्भूमिं ताडयेत् । ॐ तीक्ष्णदंष्ट्र महाकाय कल्पान्तदहनोपम भैरवाय नमस्तुभ्यमनुज्ञां दातुमर्हसि । इति भैरवस्य अनुज्ञां चादाय पूर्वोक्तमासनमध्यास्य विनियोगमुच्चरेत्— ॐ कारस्य

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ब्रह्मा ऋषिः परमात्मा देवता दैवी गायत्री छन्दः सर्वकर्मारम्भे विनियोगः । भूरादिसप्तव्याहृतिनां प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यश्छन्दांसि अग्निर्वायुः सूर्यो बृहस्पतिर्वरुण इन्द्रो विश्वेदेवा देवताः तत्सवितुरिति विश्वामित्र ऋषिर्गायत्री च्छन्दः सविता देवता आपो ज्योतिरिति प्रजापति ऋषिर्द्विपदा गायत्री छन्दो ब्रह्माग्निवायुसूर्या देवताः सर्वेषां प्राणायामे विनियोगः इत्युक्त्वा यथाविधि प्राणवायुं नियम्य ॐ भूः ॐभुवः ॐ स्वः ॐ तत्सवितु० दयात् ॐ आपो-ज्योति रसो ऽ मृतं ब्रह्म भूर्भुवः स्वरोम् इति पूरक-कुम्भक-रेचक-विधिना नवधावृत्य ॐ उपात्तदुरितक्षयाय प्रातः (मध्यान्ह सायं निशीथ) सन्ध्यामहमुपासिष्य इति प्रतिज्ञाय

प्रातः— ॐ आयाहि वरदे देवि त्र्यक्षरे ब्रह्मवादिनि ।
गायत्रिच्छन्दसां मातर्ब्रह्मयोने नमोस्तु ते ॥इति

मध्याह्ने:-ॐ आयाहि वरदे देवि त्र्यक्षरे रुद्रवादिनि ।
सावित्रि च्छन्दसां माता रुद्रयोने नमोस्तु ते ॥

सायाह्ने:-आयाहि वरदे देवि त्र्यक्षरे विष्णुवादिनि ।
सरस्वति च्छन्दसां मातर्विष्णुयोने नमोस्तु ते॥

निशीथे:- आयाहि वरदे देवि अर्धमात्रात्मवादिनि ।
प्रत्यगात्मन् वेदमातः पञ्चकृत्ये नमोस्तु ते॥

इत्यावाहनमन्त्रेण सन्ध्यामावाह्य, सूर्यश्च मेति नारायणऋषिः गायत्र्युपरिष्टाद् बृहतीच्छन्दः सूर्यो देवता आचमने विनियोगः । ॐ सूर्यश्च मा मन्यु श्च मन्युपतयश्च मन्यु-कृतेभ्यः पापेभ्यो । रक्षन्तां यद् रात्र्या पापमकार्षं मनसा वाचा

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

हस्ताभ्यां पद्भ्यामुदरेण शिश्ना रात्रिस्तदवलुम्पतु यत्किं च दुरितं मयि इदमहं माममृतयोनौ सूर्ये ज्योतिषि जुहोमि स्वाहा। इति सकृदाचम्य पुनः स्मार्तमाचनं कुर्यात्।

मध्याह्ने —ॐ आपः पुनन्त्विति मारीचकश्यपऋषिरनुष्टुप्छन्दः आपो देवता आचमने विनियोगः। ॐ आपः पुनन्तु पृथिवीं पृथिवी पूता पुनातु माम्। पुनन्तु ब्रह्मणस्पतिर्ब्रह्मपूता पुनातु माम। यदुच्छिष्टमभोज्यं च यद् वा दुश्चरितं मयि। सर्वं पुनन्तु मामापोऽसमां च प्रतिग्रहर्ठं स्वाहा। इति— सकृदाचम्य पुनः स्मार्तमाचमन कुर्यात्।

सायाह्ने- ॐ अग्निश्च मेति नारायणऋषिर्गायत्र्युपरिष्टाद् बृहतीच्छन्दोग्निर्देवता आचमने विनियोगः।

ॐअग्निश्चमा मन्युश्च मन्युपतयश्च मन्युकृतेभ्यः पापेभ्यो रक्षन्तां यदह्ना पापमकार्षं मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना अहस्तदवलुम्पतु यत्किं च दुरितं मयि इदमहं माममृतयोनौ सत्ये ज्योतिषि जुहोमि स्वाहा। इत्याचम्य स्मार्ताचमनं कुर्यात्।

तुरीयसन्ध्यायाम् —ॐ आपः पुनन्त्विति मध्याह्नसन्ध्याऽऽचमनवत् कुर्यात्। ततः कुशानादाय ॐआपो हिष्ठेति ऋक्त्रयस्य सिन्धुद्वीप ऋषिरापो देवता गायत्रीच्छन्दः पर्णकषायोदकासेके विनियोगः इति स्मृत्वा कुशाग्रेणापः समादाय ताभिरद्भिः ॐ आपोहिष्ठा मयोभुवः ॐ तान ऊर्जे दधातन। ॐ महेरणाय चक्षसे। ॐ यो वः शिवतमो रसः। ॐतस्य भाजयतेह नः। ॐ उशतीरिव मातरः इति भूमौ वा। ॐ तस्मा अरं गमाम वः। ॐ यस्य क्षयाय जिन्वथ। ॐ आपो जनयथा च नः। इति नवभिः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पादैः शिरोऽभिषिञ्चेत् । ततः ॐ द्रुपदादिवेति प्रजापत्य-श्विसरस्वत्य ऋषयोऽनुष्टुप्छन्द आपो देवता सौत्रामण्य-वभृथे वासोपासने विनियोगः इति स्मृत्वा ॐ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव । पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः। इति जपित्वा चुलुके जलमादाय तत्र नासाग्रमाधाय तज्जलं वामभूमौ उत्सृजेत् । ततः ॐ ऋतं च सत्यं चेति त्र्यृचस्य अघमर्षण ऋषिरनुष्टुप् छन्दो भाववृत्तिर्देवता अश्वमेधावभृथे विनियोग इति स्मृत्वा चुलुके जलमादाय तत्र नासाग्रमाधाय ॐ ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत । ततो रात्रिरजायत ततः समुद्रो अर्णवः । समुद्रादर्णवादधि संवत्सरोऽजायतः । अहोरात्राणि विदधद् विश्वस्य मिषतो वशी । सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवं च पृथ्वीं चान्तरिक्षमथो स्वः । इति जपित्वा तज्जलं भूमौ उत्सृजेत् । आचमेच्च ॥ ततः पुष्पाणि अम्बुमिश्राणि अञ्जलिना समादाय उत्थाय सप्रणवव्याहृतिकां गायत्रीं जपित्वा ब्रह्मस्वरूपिणे श्रीसूर्यनारायणाय इदमर्घ्यं समर्प-यामि नमः इति च पठित्वा आदित्याभिमुखानि त्रिरूर्ध्वं क्षिप्त्वा कालातिपाते आकृष्णेनेति मन्त्रेण चतुर्थं चाञ्जलिं क्षिप्त्वा ॐ असावादित्यो ब्रह्मेति चुलुकेनात्मनः समन्तात्पर्युक्ष्य बाहू सूर्याभिमुखावुत्क्षिप्य उद्वयमिति प्रस्कण्व ऋषिरनुष्टुप्छन्दः सूर्यो देवता जलादुत्क्रमणे विनियोगः । उदुत्यमिति प्रस्कण्व ऋषिर्गायत्री च्छन्दः सूर्यो देवता दक्षिणहोमे विनियोगः । चित्रं देवानामिति कुत्स आङ्गिरस ऋषिस्त्रिष्टुप्छन्दः सूर्यो देवता दक्षिणहोमे विनियोगः। तच्चक्षुरिति दध्यङ्ङाथर्वण ऋषिः एकाधिका

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

त्राह्मी त्रिष्टुप् व्यूहेनात्यष्टिर्वा छन्दः सूर्यो देवता महावारशान्तिकरणे विनियोगः,इत्यभिधाय उद्वयम्, उदुत्यं, चित्रं, तच्चक्षुरित्येताभिर्ऋग्भिः सूर्यमुपस्थाय ते जोसीति परमेष्ठी प्रजापतिर्ऋषिर्यजुः आज्यं देवता आज्यावेक्षणे गायत्र्यावाहने विनियोगः। गायत्र्यसीति आदित्य ऋषिर्गायत्री छन्दः परमात्मा देवता गायत्र्यावाहने विनियोगः। तेजोसि. गायत्रस्येकपदीति च पठित्वा गायत्रीमुपतिष्ठेत। ततः प्रणवस्य परब्रह्मऋषिर्गायत्री छन्दः परमात्मा देवता व्याहृतीनां प्रजापति ऋषिर्गायत्र्युष्णिगनुष्टुप् छन्दांसि अग्निवायुसूर्या देवता तत्सवितुरिति ब्रह्मादित्ययाज्ञवल्क्यविश्वामित्रा ऋषयः गायत्रीच्छन्दो ब्रह्मात्मासविता देवता वायव्यं वीजं चतुर्थं शक्तिः पञ्चविंशति व्यञ्जनानि कीलकं चतुर्थं पदं प्रणवो वा ब्रह्मा शिरः विष्णुः हृदयं,। अग्निर्मुखं रुद्रः कवचं परमात्मा शरीरं, सांख्यायनगोत्रा सप्त स्वराः सरस्वती जिह्वा. पिङ्गाक्षी त्रिपदा गायत्री, ब्रह्मभूयाय जपे विनियोगः। इति पठित्वा जलमुत्सृज्य ॐभूः अंगुष्ठाभ्यां नमः,ॐभुवः तर्जनीभ्यां. ॐ स्वः मध्यमाभ्यां० ॐ तत्सवितुर्वरेण्यम् अनामिकाभ्यां.ॐभर्गो देवस्य कनिष्ठिकाभ्यां० ॐ धियो योनः करतलकर पृष्ठाभ्यां० इति विन्यस्य भूः हृदयाय नमः भुवः शिरसे स्वाहा स्वः शिखायैवषट्-तत्सवितुर्वरेण्यम् कवचाय हुँ भर्गो देवस्य धीमहि नेत्रत्रयाय वौषट् धियोयोनः प्रचोदयात् अस्त्रायफट् इति च विन्यस्य ध्यायेत्—

ध्येयः सदा सवितृमण्डलमध्यवर्ती
नारायणः सरसिजासन संनिविष्टः।
केयूरवान् मकरकुण्डलवान् किरीटी
हारी हिरण्मयवपुर्धृतशङ्खचक्रः ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

इति सूर्यमण्डलगत विष्णुं (स्वेष्टदैवतं वा) ध्यात्वा

ॐ बहुरूपिणि गायत्रि दिव्ये संध्ये सरस्वती ।
अजरे अमरे देवि ब्रह्मयोने नमोऽस्तु ते ॥

देवी गायत्रि ब्रह्मशापाद् विमुक्ता भव, विश्वामित्रशापाद् विमुक्ता भव,वशिष्ठशापाद् विमुक्ता भव, गौतमादिशापाच्च विमुक्ता भव इति पठित्वा सुमुखादिमुद्राः प्रदर्श्य सूर्याभिमुखो निमीलितनयनो मन्त्रार्थमनुस्मरन अविक्षिप्तचित्तः स्फटिकपद्माक्षरुद्राक्षपुत्रंजीवकुशग्रन्थिहस्तपर्वणां मध्ये पूर्वपूर्वाभावे उत्तरोत्तरयजपमालया प्रणवव्याहृतिपूर्वां प्रणवान्तां गायत्रीं सहस्रकृत्वः शतकृत्वो वा शक्तितो जपित्वाऽऽचम्य पूर्वोक्तं षडङ्गन्यासं कृत्वा सुरभिप्रभृति मुद्राः प्रदर्श्य विभ्राडित्यादीनां चतुर्दशानां विभ्राट् प्रस्कण्वागस्त्य--श्रुतकक्ष -सुकक्ष--प्रस्कण्व--कुत्स--जमदग्नि--नृमेध --कुत्स--हिरण्यस्तूपाङ्गिरसा ऋषयः प्रथमा जगती, ततस्तिस्रो गायत्र्यः आन इति त्रिष्टुव् यदद्येति तरणिरिति च गायत्री, तत्सूर्यस्य तन्मित्रस्येति च त्रिष्टुभौ, वण्महाँ वट् सूर्य इति च बृहतीसतोबृहत्यौ, श्रायन्त इति बृहती,अद्यादेवा इति आकृष्णेति च त्रिष्टुभौ, प्रतीकोक्ताः तं प्रयत्नथा अय वेनश्चित्रमिति च जगतीत्रिष्टुभौ च सर्वेषां सूर्यो देवता सर्वमेधे सूर्यसंस्तवे तृतीयहविर्ग्रहणे सूर्योपस्थाने विनियोगः । सहस्रशीर्षेति षोडशानां नारायणपुरुष ऋषिः पञ्चदशानामनुष्टुप् षोडदश्यास्त्रिष्टुप् पुरुषोदेवता पुरुषमेधे पशुत्वेन नियुक्तानां पुरुषाणां ब्रह्मणा प्रयुक्ताभिष्टवे सूर्योपस्थाने विनियोगः । यज्जाग्रत इति षण्णां शिवसंकल्पऋषिस्त्रिष्टुप्छन्दो मनो देवता अनारभ्या-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धीतत्त्वात्कात्यायनवचनाच्च सूर्योपस्थाने विनियोगः । मण्डल-ब्राह्मणस्य ब्रह्मादित्ययाज्ञवल्क्यमध्यंदिना ऋषयः यजुः सूर्यो देवता सूर्योपस्थाने विनियोगः । इत्यभिधाय विभ्राडित्यनुवाक-पुरुषसूक्त--शिवसंकल्प--मण्डलब्राह्मणैरुपांशुपठित्वा सूर्योपस्थान कुर्यात् । ततः विश्वतश्चक्षुरिति मन्त्रस्य विश्वकर्मा भौवन ऋषिः त्रिष्टुप्छन्दः विश्वकर्मा देवता शालाद्वार्ये आज्यहोमे सूर्यप्रदक्षिणायां विनियोगः ।

ॐविश्वत श्चक्षुरुत विश्वतो मुखो विश्वतो बाहुरुतः विश्वतस्पात् । संबाहुभ्यां धमति संपतत्रैर्द्यावा भूमीं जनयन् देव एकः । इति सूर्य प्रदक्षिणीकृत्य एकचक्र इति नारायणऋषिरुष्णिक् छन्दःसूर्यो-देवता सूर्यनमस्कारे विनियोगः ।

ॐ एकचक्रो रथो यस्यः दिव्य कनकभूषितः ।

स मे भवतु सुप्रीतः पद्महस्तो दिवाकरः ॥ इति नमस्कृत्यो-पविश्य ॐदेवागा तुविद इति मनसस्पति ऋषिः विराट् छन्दो वातो देवता समिष्टयजुर्होमे जपनिवेदने विनियोगः ।

ॐ देवा गातुविदों गातुं वित्वा गातुमित । मनसस्पत इमं देव यज्ञ ठं स्वाहा वाते धाः । इति जपं निवेद्य, अनेन प्रातः—मध्याह्नः- सायं-निशीथसंध्याङ्गभूतेन यथाशक्तिकगायत्रीजपादि-कर्मणा ब्रह्मस्वरूपी श्रीसूर्यनारायणः प्रीयताम् ॐ तत्सन्न मम ।

यदक्षरपदभ्रष्टं मात्राहीनं च यद् भवेत् ।

तत्सर्वं क्षम्यतां देवि काश्यपप्रियवादिनि ॥ इति प्रार्थ्य उत्तेर शिखर इति कश्यप ऋषिः अनुष्टुप्छन्दः संध्या देवता सध्याविसर्जने विनियोगः ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उत्तेर शिखरे देवि भूम्यां पर्वतमस्तके ।
ब्राह्मणेभ्यो विनिर्मुक्ता गच्छ देवि यथासुखम् ॥

इति विसृज्यं··· गोत्रोत्पन्नः··· ···प्रवरः··· शुक्लयजुर्वेदान्तर्गतमाध्यन्दिनशाखाध्यायी··· ···शर्माहं भो आचार्य त्वामभिवादये। भो वैश्वानर त्वा०। भो सूर्याचन्द्रमसौ युवा०। — यो याज्ञवल्क्य त्वा०। भो ईश्वर त्वा०। आकाशात्पतितं तोयं यथा गच्छति सागरम्। सवदेवनमस्कारः केशवं प्रतिगच्छति। इति पठित्वा आचम्या यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं संपूर्णतां याति सद्यो वन्दे तच्युतम्। इति पठित्वा अनेन प्रातः- मध्याह्न-सायं-निशीथसंध्योपासनाकर्मणा ब्रह्मस्वरूपी परमेश्वरः प्रीयतामिति समर्प्य ॐ ब्रह्मपाश सहस्रेण रुद्रशूलशतेन च ॥ विष्णुचक्रसहस्रेण शिखामुक्तिं करोम्यहम् इति शिखामुन्मुच्य पूर्ववत् शिखां बध्नीयात्। इति स्मृत्यन्तरोक्तसमुच्चयेन कात्यायनसूत्रविहितं संक्षिप्तसंध्योपासनम्। केवल कात्यायनसूत्रविहितं तु प्राणायामाञ्जलिप्रक्षेपादित्योपस्थानान्तं त्रिकण्डिकासूत्रमात्रानुसारिणां शास्त्रार्थानुष्ठानमात्रकरणम्।

बह्वल्पं वा स्वगृह्योक्तं यस्य यावत् प्रकीर्तितम्।
तस्य तावति शब्दार्थे कृते सर्वः कृतो भवेत्, इति स्मृतेः।

इति संध्याविधिः।

आगमानुसारिणीसंध्या

प्रातः संध्या। आदौ आसनसंस्कार-जलशोधन-सूर्यार्घ-दिग्बन्धनादिकं विधाय यँ रँ वँ लँ हँ इत्यभिमन्त्र्याघमर्षणम्। ॐ ऋग्वेदाय स्वाहा ॐ यजुर्वेदाय स्वाहा ॐ सामवेदाय स्वाहा

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ अथर्ववेदाय स्वाहा ॥ इत्याचम्य ॐ अस्य श्रीभूरादि-व्याहृतिसप्तकस्य जमदग्निभरद्वाजभृगुगोतमकश्यपविश्वामित्र-वसिष्ठा ऋषयः गायत्र्युष्णिगनुष्टुब्बृहतीपङ्क्तित्रिष्टुब्जगत्यश्च छन्दांसि न्यासे विनियोगः। ॐभूः पादयोः। ॐ भुवः जानुनोः। ॐ स्वः गुह्ये, ॐमहः नाभौ, ॐ जनः हृदये। ॐ तपः कण्ठे। ॐ सत्यं ललाटे। ॐ भूः नमो हृदये। ॐ भुवः नमो मुखे। ॐ स्वः नमो दक्षस्कन्धे। ॐ महः नमो वामस्कन्धे। ॐजनः नमो दक्षोरौ। ॐ तपः नमो वामोरौ ॐ। सत्य नमो जठरे।

ॐ तत्सवितुरित्यस्य विश्वामित्र ऋषिः गायत्रीच्छन्दः सविता देवता परमेश्वरीगायत्रीप्रीतये जपे विनियोगः।

ॐ तत्सवितुः हृदयाय नमः। ॐ वरेण्यं शिरसे स्वाहा। ॐ भर्गोदेवस्य शिखायै वषट्। ॐधीमहि कवचाय हुँ। ॐ धियो यो नः नेत्रत्रयाय वौषट्। ॐप्रचोदयात्- अस्त्राय फट्। प्राणाया-मत्रयम्। अर्घचतुष्टयम्-गायत्रीमन्त्रेण। ध्यानम्। ॐ ब्रह्माणी चतुरानना०। मुद्रा-सुमुखं संम्पुटं०॥ मूलम्॥ ॐ भूः० भुवः स्वः ॐ तत्सवितुर्व० ॐ ब्रह्म ॐ हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्। यो ऽ सावादित्ये पुरुषः सोऽ सावहम् ॐ खं ब्रह्म। जपान्ते मुद्राः। सुरभि०। पुनराचम्य "एहि सूर्य,, मूलम इत्यनेन सूर्यार्घः। इति प्रा. सं.

अथ मध्याह्नसंध्या

आदौ पूर्ववत् आचमनान्तं समाप्य। ॐ अस्य० भूरादि० भूः पादयोरित्यादि। ॐ भर्गोदेवस्येत्येतस्य विश्वामित्रऋषिः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गायत्रीच्छन्दः भर्गो देवता परमेश्वरीसावित्रीप्रीतये जपे विनियोगः ॐ भर्गो देवस्य १ ॐ धीमहि २ ॐ धियोयोनः ३ ॐ प्रचोदयात् ४ ॐ तत्सवितुः ५ ॐ वरेण्यम् ६ । प्राणायामत्रयम् । अर्घचतुष्टयम् । ध्यानम्-शर्वाणी नवयौवना० । सुमुखादि० । मूलम्-ॐभू० भुवः स्वः-ॐ भर्गोदेवस्य धीमहि धियोयोनः प्रचोदयात् तत्सवितुर्वरेण्यम् ॐ ब्रह्म । जपान्तेः- मुद्रार्घादि पूर्ववत् ।

सायं संध्या

अथ आदौ पूर्ववत् आचम्य । ॐ अस्य श्री भूरादि० ॐ भूः पादयोरित्यादि० ॐ धियो योन इत्यस्य विश्वामित्र ऋषिः गायत्री छन्दः धीः देवता परमेश्वरीसरस्वती प्रीतये जपे ॐ धियो यो नः १ ॐ प्रचोदयात् २ॐ तत्सवितुः ३ ॐ वरेण्यम् ४ ॐ भर्गोदेवस्य ५ ॐ धीमहि ६ । प्राणायामत्रयम् । अर्घचतुष्टयम् ॐ वृद्धा नीलप्रभा० । मुद्राः पूर्ववत् । मूलम्—ॐभूर्भुवः स्वः धियो यो नः प्रचोदयात् ॐ तत्सवितुर्वरेण्यं भर्गोदवस्य धीमहि ॐ ब्रह्म । ॐ हिरण्मयेन० ॐ खं ब्रह्म । जपान्ते मुद्रादि ।

अथ तुरीया संध्या

पूर्ववत् आचमनविनियोगादिकं कृत्वा । ध्यानं सगुणम् ॐ मुक्ताविद्रुम० । निर्गुणम्--हृदि विकसितपद्मं सार्कसोमाग्निविम्बं प्रणवमयमचिन्त्यं यस्य पीठं प्रकल्प्यम् । अचलपरमसूक्ष्मं ज्योतिराकाशसारं भवतु मम मुदेऽसौ सच्चिदानन्दरूपः । मूलम् । ॐ भू. भुवः स्वः ॐ तत्सवितुर्वरेण्यं ॐ भर्गो देवस्य

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

धीमहि ॐधियोयोनः प्रचोदयात् ॐ ब्रह्म ॐ परो रजसेऽसावदोम् आपोज्योति रसोऽमृतं तत्सत् ब्रह्म भूर्भुवः स्वरोम् (इति)

ॐअस्य श्रीशापोद्धारमन्त्रस्य ब्रह्मा ऋषिः गायत्रीच्छन्दःनारायणात्मा सविता देवता तत्सवितुरिति बीजं,व्याहृतिः शक्तिः,धियो यो नः प्रचोदयात् इति कीलकम्,जमदग्निभरद्वाजभृगुगोमलकश्यपविश्वामित्रवसिष्ठादिऋषीणां शापविमोचनार्थे जपे विनियोगः।

ॐ भूः जमदग्निशापविमुक्ता भवः । ॐ भुवः भरद्वाजशापविमुक्ता भव । ॐ स्वः भृगुशाप० । ॐ महः गौतमशाप० । ॐ जनः कश्यपशाप० । ॐ तपः ॐ विश्वामित्र० । ॐ सत्यं वसिष्ठशाप० ।

प्रातः- प्रथमपादस्य जपं कृत्वा पुनः त्रिपदाया जपं कुर्यात् ।
मध्याह्ने:-द्वितीयपादस्य जपं कृत्वा पुनः त्रिपदाया जपं कुर्यात् ।
सायंः- तृतीयपादस्य जपं कृत्वा पुनः त्रिपदाया जपं कुर्यात् ।
प्रातः- भूर्भुवः स्वः ॐतत्सवितुर्वरेण्यं ॐखँ ब्रह्म ॐभूर्भुवः स्वः ॐ तत्सवितुर्वरेण्यं ॐ भर्गो देवस्य धीमहि ॐ धियो योनः प्रचोदयात् ॐ खं ब्रह्मेति-भैरवस्य पश्चात्०

मध्याह्ने:-ॐ भूर्भुवः स्वः ॐ भर्गो देवस्य धीमहि ॐ खं ब्रह्म ॐ भूर्भुवः स्वः भर्गो देवस्य धीमहि ॐ धियो योनः० भैरवस्य पश्चात्—भूर्भुवः स्वः ।
सायंकाले:- ॐधियोयोनः प्रचोदयात् ॐ खँ ब्रह्म ॐ भूर्भुवः स्वः धियोयोनः प्रचोदयात् ॐ भर्गोदेवस्य धीमहि ॐ तत्सवितुर्वरेण्यं ॐ खँ ब्रह्म ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ ब्रह्मयज्ञः

आसनोपरि न्यस्तेषु प्रागग्रेषु दर्भेषु प्राङ्मुख उपविश्य, पाणिभ्यां दर्भानादाय इषेत्वेत्यादिकस्य खंब्रह्मान्तस्य व्रतमुपैष्यन्नित्यादिकस्य वाजसनेयेन याज्ञवल्क्येनाख्यायन्त इत्यन्तस्य च मन्त्रब्राह्मणात्मकस्य माध्यन्दिनीयस्य वाजसनेयकस्य यजुर्वेदाम्नायस्य विवस्वान् ऋषिः गायत्र्यादीति छन्दांसि यजूंसि च शाखादयो ब्रह्मान्ताश्च देवताः ब्रह्मयज्ञे विनियोग इत्यभिधाय प्रणवं व्याहृतीर्गायत्रीं चाम्नायस्वरेणाधीत्य इषेत्वोर्जेत्वेत्यादितो वेदमारभ्यानुवाकशोऽध्यायशो यजुःशो वा संहितां ब्राह्मणं चाध्यायशो ब्राह्मणशो वा प्रणवावसानं यथाशक्ति प्रत्यहमधीयानो मन्त्रं ब्राह्मणं च समाप्य पुनः पुनरेवमेवारभ्य समापयेत् । प्रणवव्याहृतिगायत्रीस्वशाखीयशान्तिमंत्रपूर्वकं प्रतिदिनं पठेत् । एवमितिहासपुराणादिकमन्यदपि विद्यास्थानं ब्रह्मयज्ञसिद्धये जपेत् । तत्राप्याध्यात्मिकीं जपेदिति योगीश्वरेण पृथगभिधानाद् गीतोपनिषदादयो विशेषतो जपनीयाः जपान्ते कुशाः सौम्यदिशि प्रक्षेपणीया अत्रानध्यायो नास्ति, नास्ति नित्येष्वनध्याय इति वचनात, नित्यश्च ब्रह्मयज्ञः । इति ब्रह्मयज्ञविधिः ।

अथ तर्पणविधिः

जलतिलयवकुशाक्षतपुष्पगन्धपञ्चपात्रादिकं तर्पणोपयोगिनं सामग्रीसंभारं संभृत्य सुखासने समुपविश्य आचम्य जलतिलयवकुशानादाय पवित्रपाणिः संकल्पं कुर्यात्–हरिः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ तत्सत् ३ ॐ विष्णु ३ श्रीमद्भगवत इत्यादि शुभपुण्यतिथौ अद्येह ब्रह्मयज्ञाङ्गतया देवर्षिमनुष्यदिव्यपितृस्वपितॄणां च तर्पणं करिष्य इति संकल्प्य उपवीती प्राङ्मुखः कुशहस्तः पातितदक्षजानुर्विश्वान् देवान् आवाहयेत — ॐ विश्वेदेवास आगतेति गृत्समद-ऋषिर्गायत्री छन्दो विश्वे देवा देवता वैश्वदेवग्रहणे विनियुक्ताया देवावाहने विनियोगः— ॐ विश्वे देवास आगत शृणुताम इमं ठं हवम् ॥एदं वर्हिर्निषीदत ॥ इत्यावाह्य ॐविश्वेदेवाः शृणुतेममिति सुहोत्र ऋषिस्त्रिष्टुपछन्दो विश्वेदेवा देवताः सर्वमेधे वैश्वदेवग्रहणे विनियुक्ताया जपे विनियोगः, ॐ विश्वेदेवाः शृणुतेमठंहवं मे ये अन्तरिक्षे य उपद्यविष्ठ ॥ ये अग्निजिह्वा उत वा यजत्रा आसद्यास्मिन् वर्हिषि मादयध्वम् ॥ इति जपित्वा सव्यकरान्वारब्धः सकुशदक्षकरेणापो गृहीत्वा ॐ ब्रह्मा तृप्यतामित्यभिधाय जलमध्ये देवतीर्थेन करस्था अपः प्रक्षिप्य एवं विष्णुस्तृप्यताम्, रुद्रस्तृप्यताम् अपामुपस्पर्शः, प्रजापतिस्तृप्यताम्, देवास्तृप्यन्ताम् छन्दांसि तृप्यन्ताम् वेदास्तृ०, ऋषयस्तृ०,पुराणाचार्यास्तृ०,गन्धर्वास्तृ० इतराचार्यास्तृ० संवत्सरः सावयवस्तृप्यताम्, देव्यस्तृप्यन्ताम्, ॐ अप्सरसस्तृ०, देवानुगास्तृ०, नागास्तृ०, सागरास्तृ० पर्वतास्तृ० सरितस्तृ० मनुष्यास्तृ० यक्षास्तृ० रक्षांसितृ०(अपामुपस्पर्शः)पिशाचास्तृ०(अपामुपस्पर्शः)सुपर्णास्तृ० भूतानितृ० (अपामुपस्पर्शः) पशवस्तृ० वनस्पतयस्तृ० ओषधयस्तृ० भूतग्रामश्चतुर्विधस्तृप्यताम्, मरीचिस्तृ० अङ्गिरास्तृ० अत्रिस्तृ० पुलस्त्यस्तृ० पुलहस्तृ० ऋतुस्तृ० प्रचेतास्तृ० वसिष्ठस्तृ० भृगुस्तृ० नारदस्तृप्यतामिति प्रत्येकमेकैकं-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नाञ्जलिना तर्पयित्वा उत्तराभिमुखो भूत्वा निवीती अञ्जलौ तिरश्चः कुशान् कृत्वा सनकादयः सप्त मनुष्या इहागच्छन्तु इत्युक्त्वा अञ्जलिना अपो गृहीत्वा ॐ सनकतृप्यताम् २ इति द्विवारं अभिधाय प्रजापतितीर्थेन द्वौ जलाञ्जली जले दत्वा पुनरेवं कृत्वा सनन्दनस्तृप्यताम् २, सनातनस्तृ० २ कपिलस्तृ० आसुरिस्तृ० २ वोढुस्तृ० २, पञ्चशिखस्तृ० २ ततः प्राचीनावीती दक्षिणामुखो वामं जान्वाच्य तानेव दर्भान् मध्ये भुग्नान् कृत्वाऽऽदाय सव्याङ्गुष्ठेन तिलानादाय दक्षिणे पाणौ गृहीत्वा पितृतीर्थेन अद्भिरञ्जलि प्रपूय ॐ कव्यवाडनलादयो दिव्यपितर इहागच्छन्तु इह तिष्ठन्तु इत्यभिधाय ॐ कव्यवाडनलस्तृप्यतामिति त्रिरुक्त्वा जले दक्षिणभागे त्रीन् अञ्जलीन् दद्यात्, एवं सोमस्तृप्यताम् ३ यमस्तृ ३, अर्यमा तृ० ३ अग्निष्वात्तास्तृप्यन्ताम् ३ सोमपास्तृ० ३ बर्हिषदस्तृ० ३ यमाय नमः ३, धर्मराजाय० ३ मृत्यवे० ३ अन्तकाय० ३ वैवस्वताय० ३ कालाय० ३ सर्वभूतक्षयाय० ३ औदुम्बराय० ३ दध्नाय० नीलाय० ३ परमेष्ठिने० ३ वृकोदराय० ३ चित्राय० ३ चित्रगुप्ताय० ३ इति प्रतिदैवतं त्रींस्त्रीञ्जलाञ्जलीन्-दद्यात्। ततस्तान् भुग्नान् मोटितान् कुशान् अपः तिलाँश्च सति संभवे खड्गपात्रे रौप्यपात्रे वा निधाय आगच्छन्तु मे पितर इमान् गृह्णन्त्वपोञ्जलीन् इत्यावाह्य ॐ उदीरतामिति शङ्ख ऋषिस्त्रिष्टुप्छन्दः पितरो देवता श्राद्धे अश्नत्सु द्विजेषु जपे विनियुक्तायाः पितृतर्पणे विनियोगः

ॐ उदीरतामवर उत्परास उन्मध्यमाः पितरः सोम्यासः।
असुंयु य ईयुरवृका ऋतज्ञास्ते नोऽवन्तु पितरो हवेषु॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ तत्सत् अद्येह गोत्रः अस्मत्पिता शर्मा वसुस्वरूप-तृप्यताम् इदं तिलोदकं तस्मै स्वधा नमः। इति प्रथमाञ्जलिं दद्यात्। ततः- ॐ अङ्गिरसो न इति शङ्ख ऋषिस्त्रिष्टुप छन्दः पितरो देवताः श्राद्धे अश्नत्सु द्विजेषु जपे विनियुक्तायाः पितृतर्पणे विनियोगः- ॐ अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः॥तेषां वयर्ठं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम॥ ॐ तत्सद् अद्येह.....गोत्रः.....अस्मत्पिता शर्मा वसु-स्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः इतिद्वितीयाञ्जलिं दद्यात्। ततः-आयन्तु न इति शङ्ख ऋषिस्त्रिस्टुप्छन्द पितरो देवताः श्राद्धे अश्नत्सु द्विजेषु जपे विनियुक्तायाः पितृतर्पणे विनियोगः-ॐ आयन्तु नः पितरः सोम्यासोऽग्निष्वात्ताः पथिभिर्देवयानैः। अस्मिन यज्ञे स्वधया मदन्तोऽधिब्रुवन्तु तेऽवन्त्वस्मान्॥इति पठित्वा ॐ तत्सत् अद्येहः गोत्रः अस्मत्पिता शर्मा वसुस्वरूपस्तृप्यतामिद तिलोदकं तस्मै स्वधानमइति तृतीयाञ्जलिं दद्यात्॥ ततः ॐ ऊर्जं वहन्तीरिति प्रजापति ऋषिर्विराट्छन्द आपो देवताः पिण्डपितृयज्ञे पिण्डोपरि अपां निषेके विनियुक्तायाः पितामहतर्पणे विनियोगः ॐ ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतम् स्वधास्थ तर्पयत मे पितॄन्॥ इति पठित्वा ॐ तत्सत्अद्येह.....गोत्रः अस्मत्पितामहः शर्मा रुद्रस्वरूपस्तृप्यतामिद तिलोदकं तस्मै स्वधा नम इति प्रथमाञ्जलिं दत्वा ॐ पितृभ्य इति प्रजापतिऋषिः यजूंषि पितरो देवताः सौत्रामण्यां सुराहोमे विनियुक्तायाः पितामहतर्पणे विनियोगः ॐपितृभ्यः स्वधायिभ्यः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वधानमः पितामहेभ्यः स्वधायिभ्यः स्वधानमः प्रपितामहेभ्यः स्वधायिभ्यः स्वधानमः॥ अक्षन्पितरोऽमीमदन्त पितरोऽतीतृपन्त पितरः पितरः शुन्धध्वम् इति पठित्वा ॐ तत्सत् अद्येह ·· ····· गोत्रः अस्मत्पितामह·· ·· शर्मा रुद्रस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधानमः इति द्वितीयाञ्जलिं दत्वा ॐ येचेह पितर इति प्रजापति ऋषिस्त्रिष्टुप् छन्दः पितरो देवताः श्राद्धे अश्नत्सु द्विजेषु जपे विनियुक्तायाः पितामहतर्पणे विनियोगः ॐ ये चेह पितरो ये च नेह याँश्च विद्म याँ २॥ उचन प्रविद्म ॥ त्वं वेत्थ यति ते जात वेदः स्वधाभिर्यज्ञ ठं सुकृत जुषत्र ॥ इति पठित्वा ॐतत्सत् अद्येह...गोत्रः अस्मत्पितामहः ···शर्मा रुद्रस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः इति तृतीयाञ्जलिं दद्यात् ॥ ततः ॐ मधुवाताइति गौतमऋषिर्गायत्री छन्दो विश्वेदेवा देवता दधिमधुघृतैः कूर्मेष्टकाञ्जने विनियुक्तायाः प्रपितामहतर्पणे विनियोगः- ॐ मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः ॥ माध्वीर्नः सन्त्वेषधीः ॥ इति पठित्वा ॐ तत्सत् अद्येह·····गोत्रः अस्मत्प्रपितामहः·····शर्मा आदित्यस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधानमइति प्रथमाञ्जलिं दत्वा- ॐ मधुनक्तमिति गौतमऋषिर्गायत्री छन्दो विश्वेदेवा देवताः दधिमधुघृतैः कूर्मेष्टकाञ्जने विनियुक्तायाः प्रपितामहतर्पणे विनियोगः ॐ मधुनक्तमुतोषसो मधुमत्पार्थिव ठं रजः ॥ मधुद्यौरस्तु नः पिता ॥ इति पठित्वा ॐ तत्सत् अद्येह-गोत्रः अस्मत्प्रपितामहः···शर्मा आदित्यस्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः इति द्वितीयाञ्जलिं दत्त्वा ॐमधुमान्न इति गौतम

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऋषिर्गायत्री छन्दो विश्वे देवा देवता दधिमधुघृतैः कूर्माञ्जने विनियुक्ताया प्रपितामहतर्पणे विनियोगः ॐ मधुमान्नो वनस्पति-मधुमाँ अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः॥ इति पठित्वा ॐ तत्सत् अद्येह·····गोत्रः अस्मत्प्रपितामहः···शर्मा आदित्य-स्वरूपस्तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः इति तृतीयाञ्जलिं दद्यात्।

अथ मातृतर्पणम्:-

ततः ॐ आमावाजस्येति वसिष्ठ ऋषिस्त्रिष्टुप् छन्दः प्रजा-पतिर्देवता वाजपेये नैवारचर्वालम्भने विनियुक्ताया मातृतर्पणे विनियोगः- ॐ आमा वाजस्य प्रसवो जगम्यादेमे द्यावापृथिवी विश्वरूपे॥ आमागन्तां पितरा मातरा चा मा सोमो अमृतत्त्वेन गम्यात् इति पठित्वा ॐ तत्सत् अद्येह·····गोत्रा अस्मन्माता ·····देवी वसुस्वरूपा तृप्यतामिदं तिलोदकं तस्यै स्वधा नमः इति प्रथमाञ्जलिं दत्त्वा एवमेव द्वितीयतृतीयाञ्जलि दद्यात्। एवमेव पितामहीप्रपितामहीभ्यां दद्यात्।

ततः ॐ नमो व इति प्रजापति ऋषिः यजुः षड्ऋतुरूपाः पितरो देवताः पिण्डपितृयज्ञे अञ्जलिकरणे विनियुक्तानां मातामहतर्पणे विनियोगः ॐ नमो वः पितरो रसाय नमो वः पितरः शोषाय नमो वः पितरो जीवाय नमो वः पितरः स्वधायै नमो वः पितरो घोराय नमो वः पितरो मन्यवे नमो वः पितरः पितरो नमो वो गृहान्न पितरो दत्त सतो व पितरो देष्मैतद् वः पितरो वासः इति पठित्वा -

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐतत्सत् अद्येह ... गोत्रः अस्मन्मातामहः ... शर्मा वसुस्वरूपः तृप्यतामिदं तिलोदकं तस्मै स्वधा नमः इति प्रथमाञ्जलिं दत्वा एवमेव पठित्वा द्वितीयाञ्जलिं तृतीयाञ्जलिं च दद्यात्। इममेव मन्त्रमेवं पठित्वा प्रमातामहवृद्धमातामहाभ्यां त्रींस्त्रीनञ्जलीन् दद्यात्।

तत आमावाजस्येति पठित्वा मातामही-प्रमातामही-वृद्धप्रमातामहीभ्यश्च प्रत्येकं त्रींस्त्रीनञ्जलीन् दद्यात्।

एवं पितृव्य-तत्पत्नी-भ्रातृ-तत्पत्नी-सधवभगिनी-तत्पुत्र-मातुल-मातुलानी-सधवपितृष्वसृ-पैतृष्वस्रीय-सधवमातृष्वसृ-मातृष्वस्रीय-मातुलेयादिपितृमातृसपिण्डेभ्य एकैकमञ्जलिं दत्वा समानोदक-सगोत्राचार्य-श्वशुरर्त्विक्-शिष्य-याज्यादिभ्यश्च सवर्णेभ्य एकैकमञ्जलिं दद्यात्॥

ततः-

ॐ आब्रह्मस्तम्बपर्यन्तं देवर्षिपितृमानवाः ।
तृप्यन्तु पितरः सर्वे मातृमातामहादयः॥
पितृवंशे मृता ये च मातृवंशे तथैव च ।
गुरुश्वशुरबन्धूनां ये चान्ये बान्धवा मृताः॥
ते सर्वे तृप्तिमायान्तु मद्दत्तेनाम्बुनाखिलाः ।
नरकेषु समस्तेषु यातनासु ये स्थिताः॥
तेषामाप्यायनायैतद्दीयते सलिलं मया ।
देवासुरास्तथा यक्षा नागा गन्धर्वराक्षसाः॥
पिशाचा गुह्यकाः सिद्धाः कूष्माण्डास्तरवः खगाः ।
जलेचरा भूमिचरा वाय्वाहाराश्च जन्तवः॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तृप्तिमेतेन यान्त्वाशु मद्दत्तेनाम्बुनाखिलाः ।
ये बान्धवा बान्धवा ये येऽन्यजन्मनि बान्धवाः ॥
ते तृप्तिमखिला यान्तु येचास्मत्तोयकाङ्क्षिणः ।
अतीतकुलकोटीनां सप्तद्वीपनिवासिनाम् ॥
आब्रह्मभुवनाँल्लोकानिदमस्तु तिलोदकम् ।
यत्र क्वचन संस्थानां क्षुत्तृष्णोपहतात्मनाम् ॥
इदमक्षय्यमेवास्तु मया दत्तं तिलोदकम् ॥

एवं संतर्प्य वस्त्रनिष्पीडनं कुर्यात्:—

ये के चास्मत्कुले जाता अपुत्रा गोत्रिणो मृताः ।
ते पिबन्तु मया दत्तं वस्त्रनिष्पीडनोदकम् ॥

इति मन्त्रेण स्नानवस्त्रं भूमौ निष्पीड्य तर्पणार्थान् कुशान् परित्यज्य यज्ञोपवीती भूत्वा आचम्य जले परिकल्पितषड्दलकमले ब्रह्मादिदेवानावाह्य यथासंभवम् उपचारैर्ब्रह्मविष्णुरुद्रसवितृ-मित्रवरुणान् अर्चयेत् । तद्यथा—ॐ ब्रह्मजज्ञानमिति प्रजापति ऋषिस्त्रिष्टुप्छन्दो ब्रह्मदेवता रुक्मोपधाने विनियुक्ताया ब्रह्मार्चने विनियोगः ॐ ब्रह्मजज्ञानं प्रथमं पुरस्ताद् विसीमतः सुरुचोवेन आवः ॥ स बुध्न्या उपमा अस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥ ॐ ब्रह्मणे नमः इति ब्रह्माणं समर्च्य ॐ इदं विष्णु-रिति मेधातिथि ऋषिर्गायत्री छन्दो विष्णुर्देवता सोमयागे दक्षि-णस्य अनसो दक्षिणवर्त्मनि हिरण्यं निधाय आज्यहोमे विनि-युक्ताया विष्णवर्चने विनियोगः । ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम् । समूढमस्य पांसुरे स्वाहा ॥ इति विष्णु-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मभ्यर्च्य ॐ नमस्तइति परमेष्ठी ऋषिर्गायत्री छन्द एको रुद्रो देवता शतरुद्रियहोमकर्मणि जर्तिलमिश्रगवेधुकासक्तहोमे विनियुक्तायां रुद्रार्चने विनियोगः। ॐ नमस्ते रुद्र मन्यव उतोत इषवे नमः। बाहुभ्यामुत ते नमः इति रुद्रमभ्यर्च्य ॐ तत्सवितुरिति विश्वामित्र ऋषिर्गायत्री छन्दः सविता देवता अग्निहोत्रे गार्हपत्योपस्थाने विनियुक्तायाः सवित्रर्चने विनियोगः ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात्। इति सवितारमभ्यर्च्य मित्रस्येति विश्वामित्र ऋषिर्गायत्रीछन्दः मित्रो देवता पच्यमानोखायाः श्रपणप्रक्षेपणे विनियुक्तायां मित्रार्चने विनियोगः ॐ मित्रस्य चर्षणीधृतोऽवो देवस्य सानसि॥ द्युम्नं चित्रश्रवस्तमम्॥ इति मित्रमभ्यर्च्य ॐ इमं मे वरुणेति शुनःशेप ऋषिर्गायत्री छन्दो वरुणो देवता सौत्रामण्यां याज्यायां विनियुक्तायां वरुणार्चने विनियोगः ॐ इमं मे वरुण श्रुधी हवमद्या च मृडय। त्वामवस्युराचके॥ इति वरुणमभ्यर्चयेत्॥ ततः पुष्पादिसहितं जलमादाय

ॐ एहि सूर्य सहस्रांशो तेजोराशे जगत्पते।
अनुकम्पय मां भक्त्या गृहाणार्घं दिवाकर, इति

सूर्यायार्घ्यं दत्त्वा ॐ अदृश्रमस्य केतव इति प्रस्कण्व ऋषिर्यजुरन्ता गायत्री छन्दः सूर्यो देवता द्वादशाहे सूर्यातिग्राह्यग्रहणे विनियुक्तायाः सूर्योपस्थाने विनियोगः।

ॐ हंसः शुचिषदिति वामदेवऋषिरतिजगती छन्दः सूर्यो देवता राजसूये रथावरूढस्य यजमानस्यावरोहणे विनियुक्तायाः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सूर्योपस्थाने विनियोगः ॐ अदृश्रमस्य केतवो विरश्मयो जनाँ अनु। भ्राजन्तो अग्नयो यथा। उपयामगृहीतोसि सूर्याय त्वा भ्राजायैष ते योनिः सूर्याय त्वा भ्राजाय। सूर्य भ्राजिष्ठ भ्राजिष्ठस्त्व देवेष्वसि भ्राजिष्ठोहं मनुष्येषु भूयासम् ॥ ॐ हंसः शुचिषद् वसुरन्तरिक्षसद्धोता वेदिषदतिथिर्दुरोणसत्। नृषद् वरसदृतसद् व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतं बृहत् ॥

इति मन्त्राभ्यां सूर्यमुपस्थाय प्रदक्षिणमावृत्य दिग्भ्यो दिग्देवताभ्यश्च नमस्कुर्यात् ॐ प्राच्यै दिशे नमः, इन्द्राय नमः आग्नेय्यै नमः, अग्नये नमः, अवाच्यै नमः, यमाय नमः, नैर्ऋत्यै नमः, निर्ऋतये नमः, प्रतीच्यै नमः, वरुणाय नमः। वायव्यै नमः, वायवे नमः, उदेच्यैदिशे नमः, सोमाय नमः, ऐशान्यै नमः, ईशानाय नमः, ऊर्ध्वायै नमः, ब्रह्मणे नमः, अधरायैदिशे नमः, अनन्ताय नम, इति नमस्कृत्य उपविश्य ॐ ब्रह्मणे नमः ॐ अग्नये नमः ॐ पृथिव्यै नमः, ॐ ओषधीभ्यो नमः, ॐ वाचे नमः ॐ वाचस्पतये नमः, ॐविष्णवे नमः, ॐमहद्भ्यो नमः, ॐअद्भ्यो नमः, ॐ अपांपतये नमः, ॐ वरुणाय नमः, इत्येकैकस्मै एकैकं जलाञ्जलिं दत्त्वा ॐ संवर्चसा पयसा संतनूरभिरिति परमेष्ठि प्रजापती-ऋषी त्रिष्टुप्छन्दस्त्वष्टा देवता दर्शशौर्यमासयागे पूर्णपात्रस्थजलप्रतिग्रहे विनियुक्ताया अञ्जलिना अपो गृहीत्वा मुखविमर्शने विनियोगः ॐ सं वर्चसा पयसा सन्तनूभिरगन्महि मनसा सर्ठं शिवेन। त्वष्टा सुदत्रो विदधातु रायोऽनुमार्ष्टु तन्वो यद्विलिष्टम इति मुखं विमृश्य ॐ देवागातु विद इति मनसस्पति-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ऋषिर्विराट् छन्दो वातो देवता समिष्टयजुर्होमे विनियुक्ताया स्नानादिकर्माङ्गदेवताविसर्जने विनियोगः ॐ देवा गातु विदो गातुं विदो गातुं वित्त्वा गातुमित्त । मनसस्पत इमं देव यज्ञ ठं स्वाहा वातेधाः इति पठित्वा स्नानादिकर्माङ्गदेवतां विसर्जयेत्।

अथाग्निहोत्रप्रयोगः

सायंहोमः प्रातर्होमश्चेति क्रमेण सायंप्रातः कालद्वयेऽनुष्ठीयानमेकं कर्म। तस्यैतस्य कर्मणः सायमारम्भः प्रातः समाप्तिः । अतस्तमेव क्रममाश्रित्य आदौ सायमग्निहोत्रविधिं प्रदर्श्य ततः प्रातरग्निहोत्रविधिः प्रदर्श्यते । अनस्तमिते होमशालां गत्वा बहिरेव हस्तौ पादौ प्रक्षाल्य दक्षिणेन द्वारेण प्रविश्य आसने उपविश्य पत्नीं दक्षिणत उपवेश्य आचम्य प्राणानाम्यकुशादिकमादाय देशकालौ संकीर्त्य ॐ तत्सत्-शास्त्रार्थानुष्ठानसिद्धये उद्धरणपूर्वकममुकद्रव्येण सायं प्रातः अग्निहोत्रहोमं करिष्ये । तत्रेदानीं सायमग्निहोत्रं होष्यामीति संकल्प्य आवाहनीयकुण्डे दक्षिणाग्निकुण्डे च स्थितं भस्मादिकमपसार्य पात्रान्तरे निधाय, वज्रमादाय दर्भैः परिसमुह्य, गोमयोदकाभ्यामुपलिप्य वज्रेणोलिख्य अनामिकाङ्गुष्ठाभ्यामुद्धृत्य सकुशोदकेनाभ्युक्षेत्। एवं सभ्येपि कुर्यात। ततो गार्हपत्यकुण्डादग्निमुद्धृत्य क्रमेणाहवनीयदक्षिणाग्निकुण्डयोर्निधाय प्रदीपनं कुर्यात्, एवं सभ्येपि कुर्यात् । तत आवसथ्याग्निं च प्रदीपयेत। ततः अन्तरेणापराग्नी गत्वा दक्षिणेन वा अप्रदक्षिणमाहवनीयं परीत्योपविशति यजमानः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

'दक्षिणतः स्वासनं प्रतिगत्वा' । पत्नी च यथादेशं गार्हपत्यस्य प्रत्यग्दक्षिणत उपविशेत् । ततोऽप आचामत उभौ-वृष्टिरसि वृश्च मे पाप्मान ठं सत्येन व्रतमुमैम्यापः सत्यं मयि व्रतम् इति । ततो द्विराचमनम् । अपरेणाहवनीयं मकराकृतिकूर्चं निदधाति कुशान् वा । तत आदौ आहवनीयं ततो गार्हपत्यं ततो दक्षिणाग्निं कुशैः पुरस्ताद्दक्षिणतः पश्चादुत्तरश्च प्रागुदगग्रतः परिस्तीर्य इतरथाऽऽवृत्तिं कुर्यात् । पयोहोमे गां धुक्ष्वेति प्रैषः। गार्हपत्यस्योत्तरतः पृथक्कृतेषु अङ्गारेषु दुग्धस्थालीमधिश्रयति । तृणेनावज्योत्यासिच्यापः पुनरवज्योत्य त्रिरुद्वासयति उदक् । तण्डुलादिहोमे तु गां धुक्ष्वेति प्रैषाद्यभावः । आहवनीयं पर्युक्ष्योदधारां निनयत्यागार्हपत्यात् । ततो गार्हपत्यं ततो दक्षिणाग्निं च पर्युक्षति । वैकङ्कतं स्रुक्स्रुवं प्रतप्य पाणिना संमार्ष्टि । पुनः प्रतप्योन्नेष्यामीत्याह । यजमानस्तिष्ठन् उन्नयेति प्रत्याह । ततः स्थाल्याः सकाशात् स्रुचि चतुरः स्रुवान् उन्नयति । प्रथमं, द्वितीयं, तृतीयं, चतुर्थम् । ततः स्रुग्दण्डोपरि समिधं धारयन्नुत्थाय अध्यधि गार्हपत्यादाहवनीयं हरति । मुखमात्रे धारयन् । मध्ये निगृह्योद्गृह्योपविश्य समिधमादधाति-ॐ अग्निज्योतिषं त्वा वायुमतीं प्राणवती ठं स्वर्ग्या ठं स्वर्गायोपदधामि भास्वतीम् इति । ततोऽस्तमिते सूर्ये प्रदीप्तामेनां समिधमभिलक्ष्य जुहोमि-ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा इति । अथवा ॐ सजूर्देवेन सवित्रा सजूरात्र्येन्द्रत्वयां । जुषाणो अग्निर्वेत्तु

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वाहा । इति मन्त्रेण ॥ ब्रह्मवर्चसकामस्य तु ॐ अग्निर्वर्चो ज्योतिर्वर्चः स्वाहा इति मन्त्रेण ॥

चतुर्थांशं हुत्वा, इदमग्नये नमम इति त्यागं विधाय स्रुचं कूर्चे निधाय गार्हपत्यमवेक्ष्यते, होष्यन् अस्मिन् उत्तरां भूयसीमृतां स्रुचं पुनः पूर्ववदादाय उपांशु ॐ प्रजापतये उच्चैः स्वाहा ईति मन्त्रेण पूर्वाहुतिप्रदेशादुत्तरस्यां दिशि भूयसी धारा यथा पतेत् तथा हुत्वा इदं प्रजापतये नमम इत्युच्चरेत् । भूयिष्ठं स्रुचि परिशेषयेच्च । स्रुचं द्विः प्रकम्प्य कूर्चे निदधाति । उत्तानेन पाणिना स्रुगग्रमुपमृज्य कूर्चस्योत्तरप्रदेशे निमार्ष्टि ॐनमो देवेभ्य इति । कूर्चस्य दक्षिणतः उपवीती एव ॐ स्वधापितृभ्य इति निमार्ष्टि । अप उपस्पृश्य, गार्हपत्य-दक्षिणाग्न्योः स्थाल्याः स्रुवेणादाय जुहुयात, तत्र गार्हपत्ये-ॐ इहपुष्टिं पुष्टिपतिर्दधातु इह प्रजाठं रमयतु प्रजापतिः । अग्नये गृहपतये रयिमते पुष्टिपतये स्वाहा, इदमग्नये गृहपतये रयिमते पुष्टिपतये नमः । पुनः स्थाल्या आदाय उपांशु ॐ प्रजापतये स्वाहा इदं प्रजापतये नमम इत्याहुतिद्वयं गार्हपत्ये हुत्वा, पूर्ववत् स्थाल्याः स्रुवेणादाय दक्षिणाग्नौ ॐअग्नयेऽन्नादायान्नपतये स्वाहा, इदमग्नये अन्नादाय अन्नपतये नमम: इति त्यक्त्वा पुनः स्थालयः स्रुवेणादाय उपांशु ॐ प्रजापतये स्वाहा, इदं प्रजापतये नमम इत्याहुतिद्वयं जुहुयात् । स्रौचं हुतशेषद्रव्यं पात्रान्तरे गृहीत्वा वहिर्गत्वा अनासिकया द्विः प्राश्नाति पात्रं च निर्लेढि, आचामति च । ततो हस्तौ प्रक्षाल्य आहवनीयसमीपमागत्य स्रुच्युदकं पूरयित्वा

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

उत्सिञ्चत्याहवनीयोत्तरम् ॐ देवान् जिन्व इति पुनः प्रपूर्य (प्राचीनावीनी) उत्सिञ्चति ॐ पितॄञ्जिन्व इति दक्षिणतः। अप उपस्पृश्योपवीती पुनः प्रपूर्य ईशानदिशि ॐ सप्त ऋषीञ्जिन्व इति उदुक्षति। पुनः स्रुच्युदकं पूरयित्वा कूर्चस्थापनस्थाने त्रिः कृत्वः प्राक्संस्थम् ॐ अग्नये पृथिवीक्षिते स्वाहा, ॐ पृथिव्या अमृतं जुहोमि स्वाहा, ॐ अमृते अमृतं जुहोमि स्वाहा, इति निषिञ्चति। सहैव स्रुक्स्रुवमाहवनीये प्रतप्य निदधाति कूर्चे। ततः सर्वेषु अग्निषु पर्युक्षणक्रमेण मन्त्रावृत्या तिस्रस्तिस्रः समिध आदधाति- ॐ समिदसि समिद्धो मे अग्ने दीदिहि समिद्धा ते अग्ने दीद्यासम् इति। ततः आहवनीयसमीपमागत्य तिष्ठन् तूष्णींम् उपतिष्ठते, ततस्तत्समीपे उपविशति। ततो गार्हपत्यसमीपमागत्य शयनं कुर्यात् उपविशेद् वा। येन संचरेण पूर्वं प्रविष्टस्तेनैव संचरेण निष्क्रमणं चिकीर्षु र्दक्षिणाग्निसमीपं गत्वा मनसा ध्यात्वा तिष्ठंस्तूष्णीमुपतिष्ठते। तत आहवनीयं गार्हपत्यं च नमस्कृत्य धारावर्जं पूर्ववत्पर्युक्षणं कृत्वा उभावेव स्वासने स्थित्वा वाचं विसृज्य आचामतः- ॐ विद्युदसि वृश्च मे पाप्मानं जह्यपोऽवभृथमभ्युपैमि मयि सत्यं गोषु मे व्रतम् इति। द्विराचम्य संचरविमोकं कृत्वा विष्णवे नमः इति विष्णुं स्मृत्वा गार्हपत्यात्पश्चादुपविश्य ॐ नडाय नैषधाय अन्वाहार्यपचनाय नमः। ॐ अनंश्रुते साङ्गमनाय सभ्याय नमः। ॐ असते पांसुपाय भस्मोद्वापाय नमः इत्युक्त्वा

नर्यभस्म परब्रह्म यतो मुक्तिप्रसाधकम्।
तयोरेकतरं सेव्यं संसारभयनाशनम्॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

यत्कर्मणात्यरीरिचं० नमस्ते गार्हपत्याय० नमः सभ्याव-सथ्याय० चतुर्भि० अनेन श्रौतसायंहोमाख्येन कर्मणा शास्त्रार्था-नुष्ठानसिद्धिरस्तु। ॐ तत्सत् ब्रह्मार्पणम् । ॐ हिरण्मयेन पात्रेण० ॐ पूर्णमद० इति। इदं विष्णुः०। त्रीणि पदा०। तद्विष्णो० तद्विप्रा० विष्णो रराटम्०। त्र्यायुषमिति ललाटे भस्म धारयेत्। ॐ नमो ब्रह्मणे नमोः, अस्त्वग्नये नमः, पृथिव्यै नमः, ओषधीभ्यः। नमो वाचे, नमो वाचस्पतये नमो विष्णवे महते करोमि। ॐ शान्तिः शान्तिः शान्तिः। इति श्रौतः सायंहोमप्रयोगः ।

अथ श्रौतःप्रातर्होमप्रयोगः

सति संभवे ब्रह्मयज्ञं तर्पणं च समाप्य असति संभवे ब्रह्मयज्ञं तर्पणं च होमादुत्तरकाले कर्तव्यतया अवशेष्य होमशालां प्रविश्य पूर्ववदुपविश्य आचम्य प्राणानायम्य कुशादि-कमादाय ॐतत्सत् ..... शास्त्रार्थानुष्ठानसिद्धये पूर्वसंकल्पि-ताग्निहोत्रहोमे अद्येदानींप्रातरग्निहोत्र होमं करिष्ये इति संकल्प्य सायंकालोक्तविधिना पञ्चभूसंस्कारोद्धरणाग्निप्रज्वालनकृत्यजातं विधाय समिद्धोमान्ते अनुदिते एव-

ॐ सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा। अथवा ज्योतिः सूर्य सूर्यो ज्योतिः स्वाहा, अथवा ॐ सजूर्देवेन सवित्रा सजूरुष-सेन्द्रवत्या। जुषाणः सूर्यो वेतु स्वाहा इत्यन्यतमेन मन्त्रेण जुहुयात् ब्रह्मवर्चसकामस्तु - ॐ सूर्योवर्चो ज्योतिर्वर्चः स्वाहा इति जुहुयात्। एवं प्रथमाहुतिं हुत्वा द्वितीयाहुतिप्रभृतिसमाप्ति-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation, Delhi and eGangotri.

पर्यन्तं कृत्यजातं सायंकालवत् कृत्वा क्षणं सभ्याग्नेः समीपे उपविश्य भस्मोद्धृतमुपेयात्। ततो नडायेति संसारभयं नाशनमित्यन्तं पठित्वा वक्ष्यमाणं मन्त्रजातं पठेत्

ॐ यत्कर्मणा व्यरीरिचं यद्वा न्यूनमिहाकरम्।
अग्निष्टत् स्विष्टकृद् विद्वान् स्विष्टं सुहुतं करोतु स्वाहा॥

नमस्ते गार्हपत्याय नमस्ते दक्षिणाग्नये।
नम आहवनीयाय महावेद्यै नमो नमः॥

नमः सभ्यावसथ्याभ्य नमस्ते परमात्मने।
विश्वबोधप्रबोधाय नमस्ते श्रौतवह्नये॥
चतुर्भिश्च चतुर्भिश्च द्वाभ्यां पञ्चभिरेव च।
हूयते च पुनर्द्वाभ्यां तस्मै प्रज्ञात्मने नमः॥
यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु।
न्यूनं संपूर्णतां याति सद्यो वन्दे तमच्युतम्॥

अनेन यथामति यथानुकूलं कृतेन श्रौतप्रातर्होमाख्येन कर्मणा, अथ च सायंप्रातरग्निहोत्रहोमाख्येन कर्मणा शास्त्रार्थानुष्ठानसिद्धिरस्तुः।

ॐ तत्सद् ब्रह्मार्पणम्।
ॐ हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखम्
योऽसावादित्ये पुरुषः सोऽसावहम्। ॐ खं ब्रह्म।
ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते।
ॐ खँ ब्रह्म खं पुराणं वायुरं खम्॥
ॐ शान्तिः शान्तिः शान्तिः।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्
समूढमस्य पाꣳ सुरे स्वाहा ॥
ॐ त्रीणि पदा विचक्रमे विष्णुर्गोपा अदाभ्यः ।
अतो धर्म्माणि धारयन् ॥
तद्विष्णोः परमं पदꣳ सदा पश्यन्ति सूरयः ।
दिविव चक्षुराततम् ॥
तद्विप्रासो विपन्त्यवो जागृवाꣳ सः समिन्धते ।
विष्णोर्यत् परमं पदम् ॥

विष्णो रराटमसि विष्णोः श्न प्त्रेंस्थो विष्णोः स्यूरसि विष्णोर्ध्रुवोसि । वैष्णवमसि विष्णवे त्वा । इति विष्णुं स्मृत्वा त्र्यायुषं जमदग्नेः कश्यपस्य त्र्यायुषम् इति भस्म ललाटे धृत्वा । वक्ष्यमाणं मन्त्रं पठेत्– ॐनमो, ब्रह्मणे नमो, अस्त्वग्नये, नमः, पृथिव्यै नमः, ओषधीभ्यः नमो । वाचे नमो, वाचस्पतये नमो विष्णवे महते करोमि ॥ इति ।

इति सायंप्रातरग्निहोत्रहोमप्रयोगः

अथौपासनपरिचरणम्

एवं वैताग्निकाग्निपरिचरणं कृत्वा औपासनाग्निसमीपं गत्वा पश्चादग्नेः प्राङ्मुख उपविश्य पत्नीं दक्षिणत उपवेश्य आचम्य कुशादिकमादाय ॐ तत्सत्……इत्यादि संकीर्त्य……शास्त्रार्थानुष्ठानसिद्ध्यर्थं सायंप्रातरौपासनपरिचरणं करिष्ये, सायंहोमे सायमौपासनपरिचरणं करिष्य इति संकल्प्य अग्निं प्रज्वालयेत् । ततः अग्नेरुत्तरतः प्राचः उपयमनकुशान् समिधस्तिस्रः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मणिकोदकं दध्यादीनामन्यतमं होमद्रव्यमासाद्य उपयमन-कुशान् वामहस्तेनादायोत्थाय समिधो ऽभ्याधाय मणिकोदकेन पर्युक्ष्योपविश्य द्वादशपर्वपूरणके दधितण्डुलयवानामेकतमेन द्रव्येण हस्तेनैव स्वङ्गारिणि स्वर्चिषि वह्नौ मध्यप्रदेशे देवतां ध्यायन् जुहुयात्-- ॐ अग्नये स्वाहा इदमग्नये नमम' तदुत्तरतो मनसा ॐ प्रजापतये स्वाहा इदं प्रजापतये नमम इति सायं तथैव ॐ सूर्याय स्वाहा इदं सूर्याय नमम' तदुत्तरतो मनसा ॐ प्रजापतये स्वाहा इदं प्रजापतये नमम इति प्रातर्जुहुयात्। पत्नी चेद् गर्भका मा भवति । तदा सायं प्रातश्च प्रथमामाहुतिं वक्ष्यमाणमन्त्रेण पत्नी एव जुहुयात्—

ॐ पुमार्ठसौ मित्रावरुणौ पुमार्ठसावश्विनावुभौ ॥
पुमानिन्द्रश्च सूर्यश्च पुमा र्ठं सं वर्ततां मपि पुनः स्वाहा
इदं मित्रावरुणाभ्यामश्विभ्यामिन्द्राय सूर्याय च न मम

इति त्यागं कुर्यात्। द्वितीयाहुतिं तु यजमानः स्वयमेव जुहुयात्। एवं हुत्वा पुनः पूर्ववत् पर्युक्ष्य उपयमनकुशान् निधाय वद्धाञ्जली अग्निं नमस्कुर्याताम् ॥ ततः सायं समास्त्वा इति दशभिर्मन्त्रै रग्न्युपस्थानं कुर्यात्। प्रातः विभ्रादिति सूक्तेन सूर्योपस्थानं कुर्यात् । शास्त्रार्थानुष्ठानसिद्धिं प्रोच्य ॐ तत्सत् ब्रह्मार्पणमस्तु इति पठेत् भस्मधारणं कुर्याच्च।

इत्यौपासनपरिचरणम्

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

एवं सर्वं प्रातःकृत्यं निर्वर्त्य पूजामण्डपं प्रविश्य आसने उपविश्य आचम्य प्राणायामभूतशुद्धिमातृकान्यासमन्त्रन्यासादिकं विधाय ध्यात्वा जपित्वाऽर्घस्थापनान्ते संभारं प्रोक्ष्य दिग्बन्धं कृत्वा गुरुं भैरवं च प्रणम्य रक्तपुष्पाञ्जलिमादायः—

ॐ ऐँ ह्रीँ श्रीँ लँ वँ सँ हँ इं ऐँ (यँ) कँ हँ समस्त-प्रकट-मातृका-गुप्त-गुप्ततर-परापरातिरहस्य-रहस्य-निर्गर्भ - कुलकौल-(कुलोत्तीर्ण)सम्प्रदाययोगिनीभ्यो नम इति विन्दुमध्ये पुष्पाञ्जलि समर्प्य पूजां प्रारभेत ।

१) ॐ ऐँ ह्रीँ श्रीँ अँ आँ सौँ: चतुरस्रत्रयात्मकपृथ्वीस्वरूप-त्रैलोक्यमोहनचक्राधिष्ठात्रीं त्रिपुराचक्रनायिकास्वरूपिणीं सर्वसंक्षोभिणीमुद्रादेवीसमन्वितां चार्वाकदर्शनयुतां साणिमसिद्धिम्-अणिमाद्यष्टाविंशतिशक्तिरूपप्रकटयोगिनीमयूखां श्रीमहाकामेश्वरसहितराजराजेश्वरीश्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि तर्पयामि नमस्करोमि ॥

२) ॐ ऐँ ह्रीँ श्रीँ ऐँ क्लीँ ह्रीँ वृत्तत्रयात्मकजलस्वरूपत्रिवर्गसाधनकरचक्राधिष्ठात्रीं त्रिपुरेशिनीचक्रनायिकास्वरूपिणीं-महायोनिमुद्रादेवीसमन्वितां स्मार्तदर्शनयुतां सगरिमसिद्धिं कालरात्र्यमृताकामेश्वर्याद्येकषष्टिमातृकायोगिनीमयूखां श्रीमहाकामेश्वरसहितराजराजेश्वरीश्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि तर्पयामि, नमस्करोमि ॥

३) ॐ ऐँ ह्रीँ श्रीँ ऐँ क्लीँ सौँ षोडशदलात्मकसोमस्वरूपसर्वाशापूरकचक्राधिष्ठात्रीं त्रिपुरेशीचक्रनायिकास्वरूपिणीं

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सर्वविद्राविणीमुद्रादेवीसमन्वितां बौद्धदर्शनयुतां सलघिमसिद्धिं कामाकर्षिण्यादिषोडशगुप्तयोगिनीमयूखां श्रीमहाकामेश्वरसहित-राजराजेश्वरीश्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि तर्पयामि नमस्करोमि ॥

४) ॐ ऐँ ह्रीँ श्रीँ ह्रीँ क्लीँ सौँ अष्टदलात्मकव्योमस्वरूप-सर्वसंक्षोभणचक्राधिष्ठात्रीं त्रिपुरसुन्दरीचक्रनायिकास्वरूपिणीं सर्वाऽऽकर्षिणीमुद्रादेवीसमन्वितां गाणपत्यदर्शनयुतां समहिम-सिद्धिम् अनङ्गकुसुमाद्यष्टसंप्रदाययोगिनीमयूखां श्रीमहाकामेश्वर-सहितराजरोजश्वरीश्रीमहात्रिपुरसुन्दरी—श्रीपादुकां पूजयामि तर्पयामि नमस्करोमि ।

४-क) ॐ ऐँ ह्रीँ श्रीँ ह स क ल ह्रीँ ह ल क ह स ह्रीँ स क ल ह्रीँ ह्रीँ क्लीँ सौँ चतुरस्रवृत्तत्रयषोडशदलाष्टदलात्मकपृथिवी-जलसोमव्योमस्वरूपपूर्वाम्नायापरनामकस्थितिसृष्टिचक्राधिष्ठात्री-सस्वर्गाकर्षणभैरवान्नपूर्णास्वरूपां चक्रनायिकात्रिपुरेशीस्वरूपिणीं सर्वविद्राविणीमुद्रादेवीसमन्वितां सलघिमसिद्धिं बौद्धदर्शनयुतां कामाकर्षिण्यादिषोडशगुप्तयोगिनीसमन्वितविलीनान्नपूर्णास्वरू--पिणीं श्रीमहाकामेश्वरसहितराजराजेश्वरीश्रीमहात्रिपुरसुन्दरीश्री-पादुकां पूजयामि तर्पयामि नमस्करोमि ॥

५) ॐ ऐँ ह्रीँ श्रीँ ऐँ क्लीँ सौँ कएइलह्रीँ हसकहलह्रीँ सकलह्रीं वैन्दवात्मकशिवस्वरूपसर्वानन्दमयचक्राधिष्ठात्रीं त्रिपु-रभैरवीचक्रनायिकास्वरूपिणीं सर्वयोनिमुद्रादेवीसमन्वितां शैव-दर्शनयुतां सप्राप्तिसिद्धिं रत्यादिषोडशपरापरयोगिनीमयूखां

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीमहाकामेश्वरसहितराजराजेश्वरीश्रीमहात्रिपुरसुन्दरी--श्रीपादुकां पूजयामि तर्पयामि नमस्करोमि ।

६) ॐ ऐँ ह्रीँ श्रीँ सः त्रिकोणात्मकनादस्वरूपसर्वसिद्धिप्रद-चक्राधिष्ठात्रीं त्रिपुराम्बाचक्रनायिकास्वरूपिणीं शाक्तदर्शनयुतां संपरौघपङ्क्तिं सेच्छासिद्धिं सर्ववीजमुद्रादेवीसमन्वितां तिथि-नित्यापञ्चदशनित्यायुतकामेश्वर्यादित्रितयातिरहस्ययोगिनीमयूखां श्रीमहाकामेश्वरसहितराजराजेश्वरीश्रीमहात्रिपुरसुन्दरीश्रीपादुकां-- पूजयामि तर्पयामि नमस्करोमि ॥

६ क) ॐ ऐँ ह्रीँ श्रीँ त्रिकोणाष्टारचक्रान्तराले दिव्यौघसिद्धौ-घमानवौघगुरुसंततिगुरुपङ्क्त्यायुधशक्तिस्वरूपां श्रीमहाकामेश्व-रसहितराजराजेश्वरीश्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि तर्प-यामि नमस्करोमि ।

७) ॐ ऐँ ह्रीँ श्रीँ ह्रौँ श्रीँ ह्रौँ श्रीँ सौँः कँ अष्टकोणात्मक-कालस्वरूपसर्वरोगहरचक्राधिष्ठात्रीं त्रिपुरसिद्धाचक्रनायिका-स्वरूपिणीं सर्वखेचरीमुद्रादेवीसमन्वितां वैष्णवदर्शनयुतां सभुक्तिसिद्धिं वशिन्यादिदशरहस्ययोगिनीमयूखां श्रीमहा-कामेश्वरसहितराजराजेश्वरीश्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि तर्पयामि नमस्करोमि ॥

७-क)ॐ ऐँ ह्रीँ श्रीँ हलकसह्रीँ हसकलह्रीँ हहकल ह्रीँ हसखफ्रेँ वैन्दवत्रिकोणवसुकोणात्मकशिवनादकालस्वरूपपश्चिमाम्नायापरप-र्यायस्थितिसंहारचक्राधिष्ठात्रीं घोरकुब्जिकास्वरूपां चक्रनायिका-त्रिपुराम्बास्वरूपिणीं सर्ववीजमुद्रादेवीसमन्वितां शाक्तदर्शन—

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१३) ओम् ऐँ ह्राँ श्रीँ कएईलह्रीँ ह स क ह ल ह्रीँ स क ल ह्रीँ हं ह क रँ सं ईं सं वं लं ब्रह्मात्मकतेजोरूपबिन्दुचक्रान्तर्गत-मुक्तिपदमहाबैन्दवचक्राधिष्ठात्रीं सर्वैरवाम्नायोपाम्नायनायिका-विद्येश्वरीसमयनित्या-चतुश्चरणविद्या-षडाम्नाय-सर्वाधिकार—विद्या-रश्मिसहितषडन्वयशाम्भवविद्यापरिवृतां सकौलदर्शन—सर्वकामसिद्धि सर्वत्रिखण्डामुद्रादेवीसमन्वितां महात्रिपुर-सुन्दरीरूपपरापरातिरहस्ययोगिनीमयूखां चक्रनायिकाललित—महात्रिपुरसुन्दरीस्वरूपिणीं श्रीमहाकामेश्वरसहितराजराजेश्वरी-श्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि तर्पयामि नमस्करोमि॥

१४) ओम् ऐ ह्रीँ श्रीँ ँ ं सर्वानन्दमयबिन्दुविभावित-षट्कोणचक्राधिष्ठात्रीं डाकिन्यादिषट्चक्रदेवीपरिवृतसहस्रदल—पद्मस्थडाकिनीस्वरूपां श्रीमहाकामेश्वरसहितराजराजेश्वरीश्री—महात्रिपुरसुन्दरीश्रीपादुकां पूजयामि तर्पयामि नमस्करोमि ॥

१५) ओम् ऐँ ह्राँ श्रीँ ँ ं सर्वानन्दमयबिन्दुविभावित-पञ्चसिंहासनपञ्चपञ्चिकास्वरूपिणीं श्रीमहाकामेश्वरसहितराजराजे-श्वरीश्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि तर्पयामि नमस्क-रोमि ॥

१६) ओम् ऐँ ह्राँ श्रीँ लँ रं मं क्षं वं यं सं ओं ह्रीं भूपुर-बहिश्चक्राधिष्ठात्रीं षडध्वपरिवृत—सशस्त्रेन्द्रादिदशदिक्पाल—स्वरूपिणीं श्रीमहाकामेश्वरसहितराजराजेश्वरीश्रीमहात्रिपुरसुन्दरी-श्रीपादुकां पूजयामि तर्पयामि नमस्करोमि ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१६-क) ॐ ऐँ ह्रीँ श्रीँ ह क ल स ह्रीँ क हँ ल सं ह्रीँ क लं सह ह्रीँ ँ ँ हं. कं. यं. ईँ हं स वं ल बिन्द्वादि पुरपर्यन्तोर्ध्वाम्नायात्मक-भासाचक्रापरपर्यायते जारूपपरब्रह्मात्मकमहावैन्दवसामरस्यप्रदचक्राधिष्ठात्रीं चक्रनायिकाभासानतयार्ध्वाम्नायेश्वरीश्रीप्राणदात्मिकासर्वमन्त्रेश्वरीपरदेवतास्वरूपां नवरत्नकुब्जिकानवरत्नसुन्दरी-नवरत्नकाली--निर्वाणाम्नायनायिका--निर्वाण—समय-विद्यापरिवृतां त्रिविधायुधसमन्वितश्रीमहानिर्वाणभैरवसहित—श्रीमहानिर्वाणत्रिपुरसुन्दर्यात्मकां श्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि तर्पयामि नमस्करोमि ॥

१७) ओम् ऐँ ह्रीँ श्रीँ म ख प र य घच् म्हि चड यङ् गं श फर मोक्षप्रदमहावैन्दवचक्राधिष्ठात्रीं षोडशीमहात्रिपुरसुन्दरीचक्रनायिकास्वरूपिणीं महापादुका-संप्रदाय-पादुकाकामराजचरण—पञ्चाम्बा—नवनाथ—षोडशमूलविद्या—प्रकाशचरणविमर्शचरणानुत्तरवादिन्यनुत्तरशङ्करीचतुर्दशमूलविद्यापरिवृतां त्रिखण्डमुद्रामोक्षसिद्धिसमन्वितामनुत्तराम्नायसमष्टिरूपिणीं राजराजेश्वरीश्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि तर्पयामि-नमस्करोमि ॥

एवं ध्यानावाहनासनपाद्यार्घाचमनीयस्नानीयवस्त्रोपवीतालंकारगन्धाक्षतपुष्पमालादिभिः संपूजयेत् ततः—ओं ऐं ह्रीँ श्रीँ ओम् धूरसि धूर्व धूर्वन्तं धूर्वतं योस्मान् धूर्वति त धूर्व यं वयं धूर्वामः। देवानामसि वन्हितम ठं सस्नितमं प्रप्रितमं जुष्टतमं देवहूतमम् श्रीराज०महात्रिपुरसुन्दरीश्रीपादुकायै नम इति धूपं दद्यात्। ततः ४ उद्दीप्यस्व जातवेदोपघ्नन्निर्ऋतिं मम।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

युतां परौघपङ्क्ति सेच्छासिद्धि तिथिनित्याचञ्चदशनित्यायुत-कामेश्वर्यादित्रियारिरहस्ययोगिनीसमन्वितत्रिलीनद्वारकुब्जिका — स्वरूपिणीं श्रीमहाकामेश्वरसहितराजराजेश्वरीश्रीमहात्रिपुरसुन्दरी-श्रीपादुकां पूजयामि तर्पयामि नमस्करोमि ॥

८) ॐ ऐँ ह्रीँ श्रीँ ह्रौँ क्लीँ ब्लूँ अन्तर्दशारात्मकतेजसस्वरूपसर्वरक्षाकरचक्राधिष्ठात्रीं त्रिपुरमालिनीचक्रनायिकास्वरूपिणीं सर्वमहाङ्कुशामुद्रादेवीसमन्वितां सौरदर्शनयुतां सप्राकाम्यसिद्धिं सर्वज्ञादिदशनिगर्भयोगिनीमयूखां श्रीमहाकामेश्वरसहितराजराजेश्वरीश्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि तर्पयामि नमस्करोमि ।

९) ॐ ऐँ ह्रीँ श्रीँ हसैँ हस क्लीँ सौः बहिर्दशारात्मकवायव्यरूपसर्वार्थसाधकचक्राधिष्ठात्रीं त्रिपुराश्रीचक्रनायिकास्वरूपिणीं सर्वोन्मादिनीमुद्रादेवीसमन्वितां वैदिकदर्शनयुतां सर्वाशित्वसिद्धिं सर्वसिद्धिप्रदादिदशकुलकौलयोगिनीमयूखां श्रीमहाकामेश्वरसहितराजराजेश्वरीश्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि तर्पयामि नमस्करोमि ॥

१०) ॐ ऐँ ह्रीँ श्रीँ हैँ हव क्लीँ हसौः चतुर्दशारात्मकमायाविश्वयोनिरूपसर्वसौभाग्यदायकचक्राधिष्ठात्रीँ त्रिपुरवासिनीचक्रनायिकास्वरूपिणीं सर्ववशंकरीमुद्रादेवीसमन्वितां सांख्यादिदर्शनयुतां सेशित्वसिद्धिं सर्वसंक्षोभिण्यादिचतुर्दशसंप्रदाययोगिनीमयूखां श्रीमहाकामेश्वरसहितराजराजेश्वरीश्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि तर्पयामि नमस्करोमि ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

१०क) ॐ ऐँ ह्रीँ श्रीँ हलकसह्रीँ कसहलसह्रीँ कहसलह्रीँ अन्तर्दशार-बहिर्दशार-चतुर्दशारात्मकतैजस-वायव्य-मायाविश्व-योनिरूपदक्षिणाम्नायापरनामकस्थितिचक्राधिष्ठात्रीं श्यामाकाली—स्वरूपिणीं चक्रनायिकात्रिपुराश्रीस्वरूपां सर्वोन्मादिनीमुद्रादेवी—समन्वितां सर्वशित्वसिद्धिं वैदिकदर्शनयुतां सर्वसिद्धिप्रदादिदश-कुलकौलयोगिनीसमन्वितत्रिलीनश्यामाकालीस्वरूपिणीं श्रीमहा-—कामेश्वरसहितराजराजेश्वरीश्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि तर्पयामि नमस्करोमि ॥

११) ॐ ऐँ ह्रीँ श्रीँ इँ एं कं हं चर्दशार-बहिर्दशार-स्पन्दि-चक्राधिष्ठात्रीं बालात्रिपुरात्मिकां चतुर्विंशतिगायत्रीवर्णस्वरूपिणीं श्रीमहाकामेश्वरसहितराजराजेश्वरी—श्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि तर्पयामि नमस्करोमि ॥

१२) ॐ ऐँ ह्रीँ श्रीँ इँ एँ कं हं अन्तर्दशाराष्टारस्पन्दि-चक्राधिष्ठात्रीं कालिकादिदशमहाविद्यापरिवृतबालासुन्दरीस्वरूपिणीं श्रीमहाकामेश्वरसहितराजराजेश्वरी—श्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि तर्पयामि नमस्करोमि ॥

१२-क) ॐ ऐँ ह्रीँ श्रीँ लकसह्रीँ सहकलह्रीँ हस सहकह्रीँ हं कं यं हं ईँ सं वं लं बिन्द्वादिभूपुरपर्यन्तोत्तराम्नायात्मकतिरो-धानचक्रस्वरूपानाख्याचक्रा-परपर्यायतेजोरूपब्रह्मात्मकमहावैन्द-वमुक्तिचक्राधिष्ठात्रीं त्रितीयचक्रनायिकादशाननासिद्धिकरालीगुह्य-कालीरूपां महासंप्तदशीं महात्रिपुरसुन्दरीस्वरूपिणीं श्रीमहाकामेश्वर-सहितराजराजेश्वरी—श्रीमहात्रिपुरसुन्दरीश्रीपादुकां पूजयामि तर्पयामि नमस्करोमि ॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पशूँत्त मह्यमावह जीवनं च दिशो दश। मानोहि ठं सीर्जातवेदो गामश्वं पुरुषं जगत्। अविभ्रदग्न आगहि श्रियां मा परिपातय। ओं श्री...नमः दीपं दर्शयामि, दीपानन्तरमाचमनीयं समर्पयामि ततः सर्वसंक्षोभिण्यादिमुद्राः प्रदर्शयेत्। ॥ नैवेद्यं ॥ श्रीदेव्यग्रे चतुरस्रमण्डलं सामान्यार्घ्योदकेन विधाय तत्र आधारोपरि नैवेद्यं निधाय मूलेन प्रोक्ष्य ४ वं धेनुमुद्रया अमृतीकृत्य, ४-१५ त्रिवारमभिमन्त्र्य ओं भूर्भुवः स्वः परिषिञ्चामि अमृतोपस्तरणमसि इति देव्यै अपोशानं दत्वा वामकरेण ग्रासमुद्रां प्रदर्शयेत्, दक्षिणकरेण प्राणादिपञ्चमुद्राप्रदर्शनपुरःसरं पञ्च प्राणाहुतीः कल्पयेत्।

यथाः— ४ ऐँ प्राणाय स्वाहा
४ क्लीँ अपानाय स्वाहा
४ सौः व्यानाय स्वाहा
४ ऐँ क्लीँ उदानाय स्वाहा
४ ऐँ क्लीँ सौः समानाय स्वाहा
४ ब्रह्मणे स्वाहा

४ चित्पात्रे चिद्हविः सौख्यं विविधानेकभक्षणम्॥ निवेदयामि ते देवि सानुगायै जुषाण तत्॥ मधुवाता ऋतायते मधुक्षरन्ति सिन्धवः। माध्वीर्नः सन्त्वोषधीः॥ मधुनक्तमुतोषसो मधुमत्पार्थिव ठं रजः। मधु द्यौरस्तु नः पिता॥ मधुमान्नो वनस्पतिर्मधुर्गा अस्तु सूर्यः। माध्वीर्गावो भवन्तु नः। इति पुष्पाञ्जलिं नैवेद्यजातताद्रात्म्येन समर्पयेत्। ४ राजराजेश्वर्यै श्रीमहात्रिपुर-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सुन्दर्यै अमृतपानीयं समर्पयामि। ४ अमृतपिधानमसि स्वाहा इत्युत्तरापोशनं दत्वा ४ श्रीराजराजेश्वर्यै महात्रिपुरसुन्दर्यै नमः हस्तप्रक्षालनं, गण्डूषं, पादप्रक्षालनं आचमनीयं कल्पयामि। ताम्रबलिपात्रे निवेदनसामग्रीः किंचित् किंचित् समादाय निवेदन-पात्राणि निर्गमय्य तत्स्थलं अस्त्रेण शोधयेत्। ताम्बूलम्-वनस्पति-(गन्धर्व) देवत्याय ताम्बूलाय नमः इति सामान्यार्घ्योदकेन प्रोक्ष्य ४ तमालदलकर्पूरपूगभागसमन्वितम्। एलापत्रसुसंयुक्तं ताम्बूलं प्रतिगृह्यताम्॥ ४ श्री राजराजेश्वर्यै.....नमः ताम्बूलं कल्पयामि ४॥ ॥ आन्दोल्लासविलासहासं कल्पयामि नमः॥ कर्पूर-नीराजनम्॥ ॥ ४ साम्राज्यं भौज्यं स्वाराज्यं वैराज्यं पारमेष्ठिकं राज्यं महाराज्यमाधिपत्यम्॥ ४ न तत्र सूर्योभाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोयमग्निः। तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति॥ ४ राजाधिराजाय प्रसह्य साहिने नमो वयं वैश्रवणाय कुर्महे। स मे कामान् कामकामाय मह्यं कामेश्वरो वैश्रवणो ददातु कुवेराय वैश्रवणाय महाराजाय नमः। ४ श्रीराज ... नमः। ॥ मन्त्रपुष्पम्॥ योऽपां पुष्पं वेद पुष्पवान् प्रजावान् पशुमान् भवति, चन्द्रमा वा अपां पुष्पम्। पुष्पवान् प्रजावान् भवति। ४ श्रीराज .. नमः। पुष्पाञ्जलिं समर्पयामि। ४ श्रीराज ... नमः छत्रं

४..... .....चामरयुगं कल्पयामि नमः॥

४.....दर्पणं कल्पयामि नमः॥

४.....व्यजनं कल्पयामि नमः॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वलिदानम् ॥ देव्या दक्ष भागे सामान्यार्घ्योदकेन त्रिकोण-वृत्त-चतुरस्रात्मकं मण्डलं परिलिख्य ४ ऐं व्यापकमण्डलाय नमः इति गन्धाक्षतैरभ्यर्च्य, अर्घभक्तपूरितोदकं वलिपात्रं, तत्र निन्यस्य ४ ओं ह्रीँ सर्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुँफट् स्वाहा इति मन्त्रं त्रिः पठित्वा दक्षकरार्पित वामकरतत्वमुद्रास्पृष्टं सलिलं वल्युपरि दत्वा वामपाणिघातकरास्फोटौ कुर्वाणः समुदञ्चितवक्त्रो वाणमुद्रया वलिं भूतैर्ग्रासितं विभाव्य योनिमुद्रया प्रणमेत् । ततः पादौ प्रक्षाल्य आचम्य प्रदक्षिणा-नमस्कारं कृत्वा यथाशक्ति जपमाचरेत् । गुह्यातिगुह्यगोप्त्री त्वं गृहाणास्मत्कृतं जपम् । सिद्धिर्भवतु मे देवि त्वत्प्रसादा-त्महेश्वरी ॥ (मयि स्थिरा)

ततो यथाधिकारं वैश्वदेविकहोमवल्यादिकं कर्म कुर्वीत ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ वलिवैश्वदेवप्रयोगः

[आवसथ्याधानोत्तरं तद्दिवस एव सायं प्रातर्होमनिमित्तं मातृपूजापूर्वमाभ्युदयिकं कृत्वा सायंसंध्यावन्दनान्तरमग्निसमीपं गत्वा पश्चादग्नेः प्राङ्मुख उपविश्य उपयमनकुशान् समिधस्तिस्रो मणिकवारिदध्यादीनामन्यतमं होमद्रव्यम्, अग्नेरुत्तरतः प्राच आसद्य उपयमनकुशानादाय तिष्ठन समिधोऽभ्याधाय पर्युक्ष्य द्वादशपर्वपूरकेण दधितण्डुलयवानामेकतमेन द्रव्येण हस्तेनैव स्वङ्गारिणि स्वर्चिषि वह्नौ मध्यप्रदेशे देवतां ध्यायन् जुहुयात्]

ॐ अग्नये स्वाहा इदमग्नये न मम, तदुत्तरतो मनसा ॐ प्रजापतये, उच्चैः स्वाहा, इदं मनसा प्रजापतये, उच्चैः न मम, ॐ सूर्याय स्वाहा इदं सूर्याय न मम, मनसा ॐ प्रजापतये, उच्चैः स्वाहा इदं मनसा प्रजापतये उच्चैः न मम। ततः सति संभवे समास्त्वाग्न इत्यनुवाकेन अग्निं, विभ्राड्-बृहदित्यनुवाकेन सूर्यं च उपतिष्ठेत। तत उपविश्य अग्नेः पश्चाद् भागे प्रत्यग्द्वारं चतुष्कोणं दक्षिणोत्तरदीर्घं मण्डलं जलेन कुर्यात्-मण्डलं जलेन प्रोक्षयेच्च। ततो हुतशेषानक्षतानादाय-ॐ ब्रह्मणे स्वाहा, इदं ब्रह्मणे न मम ॐ (मनसा) प्रजापतये, (उच्चैः स्वाहा इदं, मनसा प्रजापतये उच्चैः न मम, गृह्याभ्यः स्वाहा इदं गृह्याभ्यो न मम, कश्यपाय स्वाहा इदं कश्यपाय न मम, अनुमतये स्वाहा इदंमनुमतये न मम (इति देवयज्ञः) इति पञ्चाहुतीर्हुत्वा मणिकसमीपे प्राक्संस्थमुदक्संस्थं वा वलित्रयं दद्यात्- हुतशेषाक्षतानादाय ॐ पर्जन्याय नम इदं

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पर्जन्याय न मम, अद्भ्यो नम इदमद्भ्यो न मम, पृथिव्यै नम इदं पृथिव्यै न मम इति दद्यात्। ततश्चतुष्कोणमण्डलद्वार-बहिः उदक्संस्थम् ॐ धात्रे नम इदं धात्रे न मम, विधात्रे नम इदं विधात्रे न मम इति द्वौ वली दद्यात्; ततो मण्डलस्य चतुर्दिक्षु रेखाभ्यन्तरं रेखासमीपे हुतशेषैरक्षतैः- ॐ वायवे नमः इदं वायवे न मम प्राच्यां, वायवे नम इदं वायवे न मम इति दक्षिणस्यां, ॐ वायवे नम इदं वायवे न मम इति प्रतीच्याम्, ॐ वायवे नम इदं वायवे न मम इत्युदीच्यां चतुरो वलीन् दद्यात्। ततो वायुवलीनामुत्तरत्र पूर्वत्र च रेखाभ्यन्तरे रेखासमीपे एव ॐ प्राच्यै दिशे नम इदं प्राच्यै दिशे न ममेति प्राच्यामुत्तरत्र, ॐ अवाच्यै दिशे नम इदमवाच्यै दिशे न ममेति दक्षिणस्यां पूर्वत्र, ॐ प्रतीच्यै दिशे नम इदं प्रतीच्यै दिशे न ममेति प्रतीच्या-मुत्तरत्र, ॐ उदीच्यै दिशे नम इदमुदीच्यै दिशे न ममेति उत्तस्यां पूर्वत्र। ततः प्राक्प्रत्यक् च दत्तयोर्वायुवल्योरन्तराले प्राक्संस्थम् ॐ ब्रह्मणे नम इदं ब्रह्मणे न मम, ॐ अन्तरिक्षाय नम इदमन्तरिक्षाय न मम, ॐ सूर्याय नम इदं ठं सूर्याय न मम इति वलित्रयं दद्यात, तेषामुत्तरत्र ॐ विश्वेभ्यो देवेभ्यो नम इदं विश्वेभ्यो देवेभ्यो न मम ॐ विश्वेभ्यो भूतेभ्यो नम इदं विश्वेभ्यो भूतेभ्यो न ममेति द्वौ वली दत्त्वा तयोरुत्तरत्र ॐ उषसे नम इदमुषसे न मम ॐ भूतानां पतये नम इदं भूतानां पतये न मम इति द्वौ वली दद्यात्, इति भूतयज्ञः ततो ब्रह्मादीनां वलीना दक्षिणप्रदेशे प्राचीनावीती दक्षिणामुख ॐ पितृभ्यः स्वधा नम इदं पितृभ्यो

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न ममेत्येकं वलि पात्रावशिष्टैरक्षतैर्दद्यात्। (इति पितृयज्ञः) ततः पात्रं प्रक्षाल्य तेनैव जलेन तस्यैव मण्डलस्य वायव्यकोणे ॐ यक्ष्मैतत्ते निर्णेजनम् इदं यक्ष्मणे न ममेति दद्यात्। (श्राद्धदिने एतत्पर्यन्तं कर्म विधाय श्राद्धं कृत्वा तदन्तेऽवशिष्टं कृत्यं कर्तव्यम्) ततः काकादिवलीन् वहिर्दद्यात् तद् यथा—

ॐ ऐन्द्रवारुणवायव्याः सौम्या वा नैर्ऋतास्तथा।
वायसाः प्रतिगृह्णन्तु भूमौ पिण्डं मयार्पितम्॥
इदं वायसेभ्यो न मम॥

ॐ द्वौ श्वानौ श्यामशवलौ वैवस्वतकुलोद्भवौ।
ताभ्यां पिण्डं प्रदास्यामि स्यातामेतावहिंसकौ॥
इदंठंश्वभ्यां न मम।

ॐ देवा मनुष्याः पशवो वयांसि सिद्धाश्च यक्षोरगदैत्यसंघाः।
प्रेताः पिशाचास्तरवः समस्ता येचान्नमिच्छन्ति मया प्रदत्तम्॥
इदं देवादिभ्यो न मम॥

ॐ पिपीलिकाः कीटपतङ्गकाद्या वुभुक्षिताः कर्मनिबन्धवद्धाः।
तृप्त्यर्थमन्नं हि मया प्रदत्तं तेषामिदं ते मुदिता भवन्तु॥
इदं पिपीलिकादिभ्यो न मम॥

ततो गां संपूज्य—

ॐ सुरभिर्वैष्णवी माता नित्यं विष्णुपदे स्थिता।
गोग्रासस्तु मया दत्तः सुरभे प्रतिगृह्यताम्॥
इदंठंसुरभ्यै न मम इति गोग्रासं दद्यात्॥ ततो हस्तौ पादौ प्रक्ष्याल्य अतिथिप्राप्तौ निवीती भूत्वा अतिथिं संपूज्य अन्नं परिवेष्योदङ्मुखः

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ हन्त तेऽन्तम् इदं मनुष्याय न ममेति प्रोच्य तं भोजयेत् तदभावे कस्मिँचित् पात्रे अन्नं तण्डुलान् वा निधाय ॐ हन्ततेऽन्नमिदं मनुष्यायेति संकल्प्य ब्राह्मणाय दातुमुत्सृजेत् ॥ तत उपवीती हस्तौ पादौ प्रक्षाल्य नित्यश्राद्धार्थमुपविशेत् ।

नित्यश्राद्धविधिः

—०—

स्वागतपूर्वकं ब्राह्मणं कुशवटुं वा समभ्यर्च्य पादौ प्रक्षाल्याचम्य गृहं प्रवेश्य कुशान्तर्हितासने उपवेश्य स्वयमप्याचम्य प्राङ्मुख उपविश्य कुशादिकमादाय ॐ तत्सद्··· गोत्र— शर्माहं··· गोत्राणां···पितृपितामहप्रपितामहानां सपत्नीकानां··· शर्मणां वसुरुद्रादित्यस्वरूपाणां तथा— गोत्राणां ---- मातामह-प्रमातामहवृद्धप्रमातामहानां···शर्मणां सपत्नीकानां वसुरुद्रादित्य-स्वरूपाणां नित्यश्राद्धमहं करिष्य इति संकल्प्य श्रीवासुदेवं स्मृत्वा सावित्रीं जपित्वा देवताभ्यः पितृभ्यश्चेति गयायै नमः गदाधाराय नम इत्यन्तं पठित्वा अपसव्येन दक्षिणामुखो ब्राह्मणं पाद्याचमनगन्धपुष्पधूपदीपादिभिःसंपूज्य तिलजलमधुघृतयुतमन्नं पुरतोः निधाय कुशादिकं गृहीत्वा ॐ अद्येह···गोत्रेभ्यः— पितृपितामहप्रपितामहेभ्यः··· शर्मभ्यः सपत्नीकेभ्यो वसुरुद्रा-दित्यस्वरूपेभ्यस्तथा··· गोत्रेभ्यः···मातामहप्रमातामहवृद्धप्रमा-तामहेभ्यः··· शर्मभ्यो वसुरुद्रादित्यस्वरूपेभ्योऽद्य कर्तव्यनित्य-श्राद्धे इदमन्नं सजलं सोपस्करं परिविष्टं परिवेक्ष्यमाणं चाक्षय्य-तृप्तिहेतोर्वः स्वधा इति दत्वा सव्येन विष्णुं स्मरेत् । ततः—

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आयुः प्रजां धनं विद्यां स्वर्गमोक्षसुखानि च ।
प्रयच्छन्ति तथा राज्यं पितरः श्राद्धतर्पिताः ॥ २ ॥
प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु यत् ।
स्मरणादेव तद् विष्णोः संपूर्णं स्यादिति श्रुतिः ॥ १ ॥

एवं नित्यश्राद्धान्तं कर्म निर्वर्त्य सर्वमपि कर्मफलं श्रीभगवच्चरणकमले समर्पयेत्—

कायैर्वाङ्मनसेन्द्रियैः प्रकृतितो बुद्ध्याऽनुसृत्यात्मना
हेनारायण यत् कृ यदकृतं नित्ये तवाराधने ।
सर्वं त्वत्पादपङ्कजेऽ र्पितवतो दासस्य मे मानसे
ऽवश्यं स्यात् त्वदनुग्रहाद् विकसितोऽ- नासक्तिः योगः परः ॥

इति समर्प्य सपुष्पं वद्धाञ्जलिः कुलदैवतं प्रार्थयेत्—

पूजान्ते कुलदैवतस्य धरणीयुक्तस्य कोलाऽऽकृतेः
श्रीपादोत्तमपङ्कजद्वयवरे पुष्पाञ्जलीनर्पये ॥
त्वत्सायुज्यमभीप्सता ऽच्युत मया श्रद्धादरानुष्ठितः
प्राप्नोतु त्वदनुग्रहादनुदिनं पूजाविधिः पूर्णताम् ॥

इति या यस्य कुलदेवता तां प्रार्थ्य संहारमुद्रया प्रसादमादाय इशानदिशि प्रसादभोजिन्यै देवतायै समर्प्य प्राचीनावीती दक्षकनिष्ठिकया गन्धमादाय चरणोदकेन सह ॐ पितरः शुधध्वमिति दक्षिणस्यां परिषिंच्य उपवीती जलमुपस्पृश्य शान्तिमन्त्रं जपित्वा चरणोदकसहितकलशजलेन आत्मानं परिवारं च अभिषिंच्य पूजावशिष्टगन्धेन ललाटे तिलकं कृत्वा वक्ष्यमाणमन्त्रं जपेत्—

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ सुचक्षा अहमक्षीभ्यां भूयासं ठं सुवर्चा मुखेन सुश्रुत्कर्णाभ्यां भूयासम् इति ॥ ततो यथार्हं भिक्षुकादिभ्यः संविभाज्येभ्यश्चान्नं संविभज्य बालज्येष्ठाश्च गृह्या यथायोग्यमश्नीयुः, ततो जायापती अश्नीतम् । पूर्वं पतिः पश्चात् पत्नीति क्रमः ।

वीरपुत्रजननकामाः क्षत्रियास्तु जायायाः समीपे कदापि नैव अश्नीयुः । इदं महद् व्रतं राजन्यबन्धुभिः पालनीयमिति शातपथी श्रुतिः ।

अथ भोजनविधिः

प्रक्षालितपाणिपादः परिहितधौतोत्तरीयो धृतश्रीखण्डगन्ध-पुण्ड्रआचान्तो गोमयोपलिप्तां भोजनशालां प्रविश्य शुद्धदेशे विहितपीठमधिष्ठाय नित्यं प्राङ्मुखः, श्रीकामः प्रत्यङ्मुखो यशस्कामश्चोऽजीवन्मातापितृकवर्जं दक्षिणामुखः सत्यकाम-श्चेदुदङ्मुखो हस्तपादास्यषु पञ्चस्वार्द्रो नीवारचूर्णैर्भस्मना गोमृदा उदकेन वा मण्डलं कुर्यात् । चतुष्कोणं ब्राह्मणस्य, त्रिकोणं ज्यावद्धधनुराकारं क्षत्रियस्य, मण्डलं वैश्यस्य, सर्वतो ऽभ्युक्षणं शूद्रस्य मण्डलं कुर्वीत, तत्र वक्ष्यमाणमन्त्रं पठेत—

ॐ यथा चक्रायुधो विष्णुस्त्रैलोक्यं परिरक्षति ।
एवं मण्डल वार्येतत् सर्वभूतानि रक्षतु ॥ इति ।

ॐ वासुदेवगदाचक्रं त्रैलोक्यं सचराचरम् ।
एवं भूमण्डलं कृत्वा सर्वभूतानि रक्षति ॥ इति ।

एवं विहितमण्डलायां भूमौ परिविष्टान्नं थालं निधाय

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तत्परितः सूपशाकोपदंशघृतशर्करायुतान् कचौरान् निधाय अन्नस्तुति कुर्यात्—

ॐ पितुं न स्तोषं महो धर्माणं तविषीम् ॥
यस्य त्रितो व्योजसा वृत्रं विपर्वमर्दयत् ॥
अन्नं ब्रह्मा रसो विष्णुर्भोक्ता देवो महेश्वरः।
एवं ध्यात्वा द्विजो भुङ्क्ते सोन्नदोषैर्न लिप्यते ॥
ब्रह्मार्पणं ब्रह्महविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥

इति अन्नं स्तुत्वा जलेन प्रोक्षयेत्:—

ॐ मा नस्तोके तनये मा न आयुषि मा नो गोषु मा नो अश्वेषु रीरिषः। मा नो वीरान् रुद्रभामिनो वधीर्हविष्मन्तः सदमित्वा हवामहे ॥

ॐ नमो वः किरिकेभ्यो देवानांꣳ हृदयेभ्यो नमो विचिन्वत्केभ्यो नमो विक्षिणत्केभ्यो नम आनिर्हतेभ्यः ॥

ॐ नमः शम्भवाय च मयोभवाय च नमः शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥ इति प्रोक्षणं कृत्वा ॐ सत्यं त्वर्तेन परिषिञ्चामि इति प्रातः ॐ ऋतं त्वा सत्येन परिषिञ्चामि इति सायं परिषिञ्चेत् । तत आज्यमादाय ॐ तेजोसि शुक्रमस्य मृतमसि धामनामासि । प्रिय देवानां मनाधृष्टं देवयजनमसि इति अन्नम् अभिमृशेत् । ततः ॐ अग्निरस्मि जन्मना जातवेदा घृतं मे चक्षुरमृतं म आसन् । अर्कस्त्रिधातू रजसो विमानोऽजस्रो घर्मो हविरस्मि नाम ॥इति

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आत्मानं अग्निं ध्यायेत्। ततः सघृतमन्नमादाय संमुखे दक्षभागे ॐ भूपतये स्वाहा नमः ॐ भुवनपतये स्वाहा नमः ॐ भूतानां पतये स्वाहा नमः ॐ चित्राय नमः (ॐ विष्णुः) चित्रगुप्ताय नमः (ॐ विष्णुः) सर्वभ्यो भूतेभ्यो नमः (ॐ विष्णु) ॐ यमाय स्वाहा (ॐ विष्णुः) धर्मराजाय स्वाहा (ॐ विष्णुः) पृथिव्यै स्वाहा इति बलीन् दद्यात्। ततो ब्रह्मतीर्थेन जलमादाय ॐ अन्तश्चरसि भूतेषु गुहायां विश्वतो मुखः। त्वं ब्रह्म त्वं यज्ञस्त्वं वषट्कार स्त्वमोङ्कारस्त्वं विष्णोः परमं पदम्। अमृतोपस्तरणमसि स्वाहा इति विष्णुमन्त्रं स्मरन आचम्य अन्नम् अमृतं ध्यायन् मौनी हस्तचापल्यादिरहितो मुखे पञ्च प्राणाहुतीर्जुहुयात् ॐ प्राणाय स्वाहा ॐ अपानाय स्वाहाः ॐ व्यानाय स्वाहा, ॐ उदानाय स्वाहा, ॐ समानाय स्वाहा, इति। एवं मुखे हुताः पञ्चप्राणाहुतीर्न दन्तैरुपस्पृशेत् केवलं जिह्वयैव ग्रसेत्। अङ्गुष्ठप्रदेशिनीमध्यमाभिः प्रथमाहुतिः। अङ्गुष्ठमध्यमानामिकाभिर्द्वितीयाहुतिः। अङ्गुष्ठानामिकाकनिष्ठिकाभिस्तृतीयाहुतिः। कनिष्ठिकातर्जन्यङ्गुष्ठैश्चतुर्थी आहुतिः। सर्वाभिरङ्गुलीभिः साङ्गुष्ठाभिः पञ्चमी आहुतिः।

ततः ॐभूतशुद्धिरस्तु इति आचम्य वामहस्ताङ्गुष्ठाऽनामिकाभ्यां जलमादाय नासापुटद्वयं चक्षुःपुटद्वयं। श्रकर्णपुटद्वयं शिखां च स्पृशेत्। ततो मौनं त्यक्त्वा यथारुचियथासुखं भुञ्जीत। भुञ्जानो वामहस्तेनान्नं न स्पृशेत्. न पादौ, न शिरो, न वस्ति, न परभोजनं स्पृशेत। एवं नातितृप्तं भुक्त्वा भुक्तशेषमन्नमादाय ॐ मद्भुक्तोच्छिष्टशेषं ये भुञ्जते पितरोऽधमाः। तेषामन्नं मया दत्त-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मक्षय्यमुपतिष्ठतु इति पितृतीर्थेन दत्वा ॐ अमृतपिधानमसि स्वाहा इति हस्तगृहीतानाम् अपाम् अर्धं पीत्वा अर्धं भूमौ निक्षिपेत्—

ॐ रौरवे पूयनिलये पद्मार्बुदनिवासिनाम् ।
अर्थिनार्थं सर्वभूतानामक्षय्यमुपतिष्ठतु ॥इति॥

ततस्तस्माद् देशादपसृत्य हस्तौ प्रक्षाल्य गण्डूषशलाकादिभिर्मुखं शोधयेत् ॥ तत आचम्य दक्षिणपादाङ्गुष्ठे जलं निस्रावयेत्—

ॐ अङ्गुष्ठमात्रः पुरुषो अङ्गुष्ठं च समाश्रितः ॥
ईशः सर्वस्य जगतः प्रभुः प्रीणातु विश्वधृक् ॥ इति।

ततः- ॐ श्वात्राः पीता भवता यूयमापो अस्माकमन्तरुदरे सुशेवाः । ता अस्मभ्यमनमीवा अनागसः स्वदन्तु देवीरमृता ऋतावृधः । इति नाभिमालभेत । ततश्च उदरमालभेत--

ॐ अगस्त्यं वैनतेयं च शनि च वडवानलम् ।
आहारपरिणामार्थं स्मरेद् भीमं च पञ्चमम् ॥ इति

ततो जलक्लिन्नाङ्गुष्ठानामिकाभ्यां नेत्रोपस्पर्शनं कुर्यात्—

ॐ शर्यातिं च सुकन्यां च च्यवनं शक्रमश्विनौ ॥
भोजनान्ते स्मरेन्नित्यं तस्य चक्षुर्न हीयते ॥ इति ।

ततः शतपदं गत्वा ताम्बूलादिभिर्मुखशुद्धिं विधाय क्षणं विश्रम्य यथासुखं विहरेत् । वाणिज्योद्योगकृषिराजसेवादिकर्मसु वा व्याप्रियेत ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीः

अथ गृह्याग्निरहितानां वैश्वदेवार्थमग्निसंस्कारः

ॐ अन्वग्निरुषसामग्रमख्यदन्वहानि प्रथमो जातवेदाः । अनुसूर्यस्य पुरुत्रा च रश्मीननु द्यावापृथिवी आततन्थ ॥

इति कस्मिँश्चन विहितपात्रे अग्निमानीय स्थण्डिलसमीपे स्थापयेत् । ततः सपुष्पाक्षतहस्तेन अग्निपात्रं स्पृशेत् ।

ॐ पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीराविवेश ॥ वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा सरिषस्पातु नक्तम् ॥

इति अग्निम्, आत्माभिमुखं स्थण्डिले स्थापयेत्:- ततः

ॐ भूर्भुवः स्वस्तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि । धियो यो नः प्रचोदयात् ।

ॐ ता ठँ सवितुर्वरेण्यस्य चित्रामाहं वृणे सुमतिं विश्वजन्याम् । यामस्य कण्वो अदुहत् प्रपीना ठँ सहस्रधारां पयसा महीं गाम् ।

ॐ विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रं तन्न आसुव ॥ इत्यग्निं प्रज्वालयेत् ।

ॐ चत्वारि शृङ्गा त्रयो अस्य पादा द्वे शीर्षे सप्त हस्तासो अस्य ॥ त्रिधा बद्धो वृषभो रोरवीति महो देवो मर्त्यां आविवेश । इत्यग्निं गन्धादिभिः संपूजयेत् । ततो हस्ते स्फ्यं कुशं वा आदाय देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यामिति ॐ अग्निस्थण्डिलस्यैशान्याम् ॐ इदमह ठँ रक्षसां ग्रीवा अपि कृन्तामि इति वर्तुलां रेखामुल्लिखेत्, तत्र यवान् क्षिपेत् तदुपरि च-

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ समुद्रोऽसि नभस्वानार्द्रदानुः शम्भूरिति कलशं स्थापयित्वा तत्र च अपः सिञ्चतिः-

ॐ आपो रेवतीः क्षयथा हि वस्वःक्रतुं च भद्रं बिभृथामृतं च ॥ रायश्च स्थ स्वपत्यस्य पत्नी सरस्वती तद् गृणते वयो धात् । ॐ आपो हिष्ठा० इति च ॥ तदुपरि पवित्रे निधाय वरुणं च पूजयेत । तमेव कलशं मणिकं भावयित्वा तत्रत्येनैव जलेन वैश्वदेविककर्माणि कुर्यात् ।

इति श्रीस्वरूपानन्देत्यागमिकनामक – बुद्धिसागरविरचिते श्रीसपर्यामृते प्रातःकृत्यविधिसहितः संक्षिप्तश्रीयन्त्रपूजाविधिः

समाप्तोऽयं प्रथमो भागः

द्रष्टव्यम्:—

श्रीचक्रपूजाविधिः प्रायेण त्रिभिः क्रमैः क्रियते सृष्टिक्रमेण, स्थितिक्रमेण, संहारक्रमेण चेति । तत्र ब्रह्मचारिभिः सृष्टिक्रमो गृहस्थैः स्थितिक्रमः सन्यासिभः सहारक्रम आश्रीयते । अयं विधिः स्थितिक्रमानुसारी ।

श्रीयन्त्रलेखनप्रकारश्च—

बिन्दुत्रिकोणवसुकोणदशारयुग्म-
मन्वस्रनागदलसंयुतषोडशारम् ।
वृत्तत्रयं च धरणीसदनत्रयं च
श्रीचक्रमेतदुदितं परदेवतायाः॥

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

तोरणवृत्तिवाद्य

हाम्रो देश केवल आधिभौतिक भावनामा जीवित देश हैन र यसका भावनाहरू आधिदैविक तथा आध्यात्मिक समेतका छन् । आधिदैविक भावनामा देवताहरूको पूजा आँचा भजन कीर्तन इत्यादि गरिन्छन् । प्रस्तुत पुस्तिका श्रीविद्याको श्रीयन्त्रमा हुने पूजा र त्यसका लागि श्रद्धालु व्यक्तिको निमित्त प्रातःकृत्यहरू के कति कसरी आचरणीय छन् भन्ने बारेमा लेखिएको हो भंने कुरा व्यक्त्याई सकिएको छ ।

श्रद्धालुहरूले श्रद्धा र शास्त्रको अनुरूप विभव अनुसार पूजा आँचा भजन कीर्तनका केन्द्रस्वरूप मन्दिरहरू बनाउने र त्यहाँ सुहाउदो प्रवन्ध पनि गर्थे र चिन्तनका संदर्भमा मन्दिरका तोरणद्वार (बाहिरी ढोका) मा बाजा गाजाको सुव्यवस्थित ढंगमा बजाउने व्यवस्था हुन्थ्यो ।

देवताका मन्दिरमा भावना दिव्य हुन्थ्यो, तसर्थ वाजाहरू दिव्य नै रहन्थे । त्यसमा वाद्यवादकहरू पनि दिव्य नै हुने कुरो स्वभाव सिद्ध हो । त्यस्ता वाद्यवादकहरूलाई ३ वर्गमा विभक्त गर्न सकिन्छ । १) गन्धर्ववर्ग । २) किन्नर वर्ग, ३) भुशुण्डिवर्ग । गन्धर्ववर्गमा पुरै मानवरूपका आउँछन् । किन्नरवर्गमा पशुमुख मानवशरीरका आउँछन् । भुशुण्डिवर्गमा पक्षिमुख मानवशरीरका आउँदछन् । १, २, १५ अंकका चित्र किन्नरका हुन् ४, ५, ७, ९, १३ अंकका चित्र भुशुण्डिका हुन् र ३. ८, १० ११, १२, १४, अंकका चित्रमा गन्धर्वका हुन् । १७ वौ चित्र

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुनाको वातसीको हो र चारै कुनामा यस्तै चित्र छ । यी चित्रहरू विशाल नगर वैष्णवी देवीका मन्दिरका वतासी (टुणाल) मा छन् र यस्ता अरू पनि दोश्रा तलाका वतासीहरूमा छन् । यो मन्दिर ऐतिहासिक हो र चित्रमा मन्दिरको पश्चिम ढोकाको उत्तर पट्टिको क्रमले अंक दिएको छ । १९९० सालको भैचालो पछि यसको जीर्णोद्धार भू. पू. प्र. मं. पद्मशंसेर ज. व. रा. ले गरेको कुरा त्यहाँका स्थानीय जनतावाट सुनिन्छ ।

त्यस मन्दिरका पेटीमा पर्न गयेको जलहरि ढुंगाको अभिलेख हेर्दा यो स्थान पूरा १५००। वर्ष अघिदेखि नै प्रसिद्धिमा आयेको भंने थाह हुन्छ । 'तोरणवृत्तिवाद्य' शब्दको चर्चा प्रस्तुत पुस्तकका १ पृष्ठमा परेको हुनाले सो कुरा सवैलाइ थाह होस् भनी यो चर्चा यहाँ गरियेको हो ।

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



किन्नरविशेष

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

किन्नरविशेष

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गन्धर्वविशेष

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भुशुण्डिविशेष

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भुशुण्डिविशेष

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



भुशुण्डिविशेष

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भुशुण्डिबिशेष

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गन्धर्वविशेष

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भुशुण्डिविशेष

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गन्धर्वविशेष

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गन्धर्वविशेष

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गन्धर्वविशेष

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



भुशुण्डिविशेष

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गन्धर्वविशेष

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

किन्नरविशेष

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

गन्धर्वविशेष अन्तर्मुख

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चारै कोणका पट्टिकाको चित्रमात्र

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC-0. Nepal Sanskrit Academy, Kathmandu

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मुद्रकः-
संकटा प्रेस
६/५२४ टेबहाल

CC-0. Nepal Sanskrit Academy, Kathmandu